M. T. B. COLLEGE, SURAT

Manuscripts Library

No Ref. 1454

Sec. 716

Title: Vedanta Sar Subodhini Tika

716

सुबोधिनीटीका on वेदान्तसार

Subodhini ṭikā on Vedānta : Title

Sāra : Author

: Editor

: Year, Vols.

: Publisher

716 : Remarks

श्रीगणेशायनमः श्रीगुरुभ्योनमः अविघ्नमस्तु श्रीवाग्देव्यैनमः ॥
कृष्णानंदं गुरुं नत्वा परमानंदमद्वयं॥ वक्ष्ये वेदांतसारस्य टीकां नाम्ना सुबो
धिनीं ॥१॥ इहखलु कश्चिन्महापुरुषो नित्याध्ययनविध्यधीतसकल
वेदराशीनां चिन्मात्राश्रयतद्रूपाद्वयानंदविषयानाद्यनिर्वचनीयभाव
रूपाज्ञानविलसितानंतभवानुष्ठितकाम्यनिषिद्धवर्जितं नित्यनैमित्तिक
प्रायश्चित्तोपासनाकर्मभिः सम्यक्प्रसन्नेश्वराणां मिष्टिकाचूर्णादिसं
घर्षितादर्शतलवदतिनिर्मलाशयानां नलिनीदलगतजलबिंदुवद्धिर
ण्यगर्भादिस्तंबपर्यंतजीवजातं स्वात्मवन्मत्वा संसारस्यांतर्गतं क्षणभंगु

रं तापत्रयाग्निसंदह्यमानमनिशमात्मन्यनुपश्यतां। अतिविवेकिनामत
एवैहिकस्रक्चंदनादिविषयार्थं आमुष्मिकहैरण्यगर्भाद्यमृतभोगेभ्यश्च
वांताशनइवातिनिर्विण्णमानसानां शमादिसाधनसंपन्नानामापाततोऽधिग
ताऽखिलवेदार्थत्वाद्देहाद्यहंकारपर्यंतं जडपदार्थतद्विलक्षणस्वप्रकाशस्व
रूपप्रत्यगात्मनि ब्रह्मानंदत्वे संशयापन्नानां तज्ज्ञेज्ञास्तूनामल्पश्रवणेन
मूलाज्ञाननिवृत्तिपरमानंदावाप्तिसिद्धये प्रकरणमारभमाणः समाप्तिप्र
चयगमनादिफलकशिष्टाचारपरिप्राप्तेष्टदेवतानमस्काररूपमंगला
चरणस्य अवश्यकर्तव्यतां प्रदर्शयन्लक्षणया अनुबंधचतुष्टयं निरूपयन्
परमात्मानं नमस्कुरुते अखंडमित्यादिना। अखंडं सच्चिदानंदमवाङ्म

वेदा॰ टी॰ नसगोचरं॰ आत्मानमखिलाधारमाश्रयेभीष्टसिद्धये १ अभीष्टस्य
निःश्रेयसस्यसिद्धयेप्राप्त्यर्थमात्मानमाश्रये एकत्वेनप्रतिपादयतइत्यर्थः
२ नन्वविषयस्यात्मनःकथंप्रतिपत्तिरित्याशंक्याह॰ अखिलाधारमिति॰ अ
खिलस्यचराचरात्मकप्रपंचस्यविवर्त्ताधिष्ठानत्वेनकारणत्वाक्रांतंब्रह्मै
वप्रतिपाद्यत्वे॰ नतुशुद्धमित्यर्थः नन्वेवंचसतिप्रतिपत्तिविषयत्वेनदृश्य
त्वापत्तिमाशंक्याह अवाङ्मनसगोचरमिति॰ यतोवाचोनिवर्त्तंतइत्या
दिश्रुतिभिरविषयत्वप्रतिप्रतिपादनात्प्रतिपत्तिविषयत्वंकारणत्वोप २
लक्षितब्रह्मविषयत्वेनौपचारिकमितिभावः एवमपिकारणत्वेऽस्यघटव

दनित्यत्वशंकामपहरन्नाह॰ सदिति॰ नाशाभावोपलक्षितस्वरूपंसदेवसो
म्येत्यादिश्रुतेः तथापिजडत्वापत्तिमाशंक्याह चिदिति॰ स्वप्रकाशचै
तन्यस्वरूपमितियावत् नतुतथाप्यपुरुषार्थत्वात्किमित्याश्रयणीयमि
त्यतआह॰ आनंदमिति॰ परमानंदरूपमित्यर्थः नतुभासितेपिलशुनेन
स्या शांतोव्याधिरितिन्यायेनप्रपंचोधिष्ठानव्यतिरिक्ततयाप्रतीयमा
नत्वात्कथमद्वैतसिद्धिरित्याशंकांतूष्णीकुर्वन्नाह॰ अखंडमिति सजा
तीयविजातीयस्वगतभेदशून्यमित्यर्थः अत्रसच्चिदानंदमितिप्रयोजनं
अखंडमितिविषयःशास्त्रविषययोःप्रतिपाद्यप्रतिपादकभावःसंबंधः तं
के

वेदां-टी. त्कामोधिकारीत्यनुबंधचतुष्टयमर्थादुक्तं भवति: किंच: यस्य देवे परा
भक्तिर्यथा देवे तथा गुरौ. तस्यैते कथिता ह्यर्थाः प्रकाशंते महात्मन इत्या
२ दिश्रुत्या गुरुनमस्कारस्यापि शास्त्रांगत्वप्रतिपादनात्तन्नमस्कारोपि द्व
थत्केन कार्य इति तन्नतिपूर्वकमभिधेयग्रंथं प्रतिजानीते. अर्थतोप्य
द्वयानंदानतीतद्वैतभानतः गुरूनाराध्य वेदांतसारं वक्ष्ये यथामति ॥ अ
पिशब्देन न केवलं शब्दतः डित्थादिवत्संज्ञामात्रं व्यवच्छिन्नमपि तु म त अर्थ
तःशब्दतश्चेति अद्वयानंदान्गुरूनाराध्य वेदांतसारं यथामति वक्ष्यते ३
इत्यन्वयः अद्वयाश्च त आनंदाश्चाद्वयानंदास्तान् अद्वयानंदांस्तान् अत्र हेतु

माहः अतीतद्वैतभानत इति. अतीतं गतं द्वैतभानं येभ्यस्तस्मादतीतद्वैतभानतः
निरस्तसमस्तद्वैतभेदज्ञानत्वादित्यर्थः तान्गुरूनाराध्य कायवाङ्मनोभिर्नम
स्कारणाचरीकृत्य वेदांतसारं वेदांतानां उपनिषद्वाक्यजातानां मध्ये यः सारः सि
द्धांतरहस्यं यस्मिन् ज्ञाते पुनर्ज्ञातव्यं नावशिष्यते तं वेदांतसारं यथामति बुद्धि
मनतिक्रम्य वक्ष्ये प्रतिपादयिष्य इत्यर्थः इदानीं सर्वस्यापि वस्तुविचारोद्दे
शकत्वात्प्रतिज्ञातं वेदांतं नामलक्षणं निर्दिशति. वेदांतो नामोपनिषत्प्रमाणं. वेदांतो
नामोपनिषत्प्रमाणं. तदुपकारीणि शारीरिकसूत्रादीनि चोपनिषद एव प्र
माणं उपनिषत्प्रमाणं उपनिषदो यत्र प्रमाणमिति वा. तदुपकारीणि वेदांत
वाक्यसंग्राहकाणि शारीरकसूत्रादीनि. अथातो ब्रह्मजिज्ञासा इत्यादीनि

वेदां॰टी॰ सूत्राण्यादिशब्देन भगवद्गीताद्यध्यात्मशास्त्राणि गृह्यंते तेषामप्युपनि
षच्छब्दवाच्यत्वादिति भावः ननु यद्यप्यवांतरानुबंधचतुष्टयमापाद्यते निर्दिष्टं त
४ थापि परमानुबंधचतुष्टयस्यानिरूपितत्वादत्र प्रेक्षावतां प्रवृत्तिर्न स्यादित्यत
आह अस्य वेदांतप्रकरणत्वात्तदीयैरेवानुबंधैस्तद्वत्तासिद्धेर्न ते पृथगालो
चनीयाः अस्य वेदांतसारस्येत्यर्थः नन्वेवं वेदांतशास्त्रस्यापि किं अनुबंध
चतुष्टयं येनास्यापि तद्वत्तासिद्धिरित्याशंक्य मूलशास्त्रस्यानुबंधचतुष्टय
माविष्करोति तत्रानुबंधो नाम अनुबंधचतुष्टयमेवाह अधिकारि ४
विषयसंबंधप्रयोजनानि यथोद्देशमधिकारं लक्षयति अधिकारी तु

विधिवदधीतवेदवेदांगत्वेनापाततोधिगताखिलवेदार्थोस्मिन् जन्मनि ज
न्मांतरे वा काम्यनिषिद्धवर्जनपुरःसरं नित्यनैमित्तिकप्रायश्चित्तोपासनानुष्ठा
नेन निर्गतनिखिलकल्मषतया नितांतनिर्मलस्वांतः साधनचतुष्टयसंपन्नः
प्रमाता स्वाध्यायोध्येतव्य इति वचनात्त्रैवर्णिकानामुपनीतानामध्ययनं
नियमेन विधीयते अध्ययनविधिप्रयुक्तमेवाध्ययनं नाध्यापनविधिप्रयु
तथा चाधीतो वेदो वेदांगानि च शिक्षाकल्पव्याकरणछंदोज्योतिर्निरुक्ता
ख्यानि यतस्तेनापाततोधिगताखिलवेदार्थः अत्र सर्ववेदार्थरहस्यज्ञाते
सति उत्तरग्रंथवैयर्थ्यपरिहाराय आपातत इत्युक्तं नन्वनधीतवेदानाम
विदुरादीनां तत्वज्ञानोपपत्तिदर्शनादध्ययनतत्प्रयुक्तकर्मानुष्ठानवैयर्थ्यमा

वे.टी. शंक्योत्तरमाह जन्मांतर इति तेषामाधुनिकाध्ययनाद्यभावेपिजन्मांज
न्मांतरीयाध्ययनादिनाचित्तपरिपाकवतोस्मिन्जन्मनिविनाप्यध्ययना
५ दिनाज्ञानोत्पत्तौबाधकाभावान्नाध्ययनादिवैयर्थ्यमितिभावः काम्येति
काम्यस्यापिकर्मणः धर्मसाधनत्वेपियातयामसंपादकत्वेनबंधकत्वा
न्निषिद्धवत्तद्वर्जनपुरःसरमित्युक्तं तथाचनित्यादिकर्मानुष्ठानेननिर्गत
निखिलकल्मषतयानिःशेषनिरस्तसकलकल्मषत्वेन अत्रनिखिलपदं
काम्यनिषिद्धजनितसुकृतदुष्कृतपरं तेननितांतनिर्मलस्वांतः नितांतं ५
अत्यंतंनिर्मलंस्वच्छंस्वांतमंतःकरणंयस्यसः तथोक्तः वक्ष्यमाणसाधन
चतुष्टयसंपन्नःप्रमाता अंतःकरणेप्रतिबिंबितचैतन्यमित्यर्थः एतदेव

स्पष्टंव्याकरोतिकाम्यादीनिस्वर्गादीष्टसाधनानिज्योतिष्टोमादीनिनिषि
द्धानिनरकाद्यनिष्टसाधनानिब्राह्मणहननादीनिनित्यान्यकरणेप्रत्यवा
यप्रत्यवायसाधनानिसंध्यावंदनादीनिनैमित्तिकानिपुत्रजन्माद्यनुबंधी
निजातेष्ट्यादीनिप्रायश्चित्तानिपापक्षयसाधनानिचांद्रायणादीनिउपास
नानिसगुणब्रह्मविषयमानसव्यापाररूपाणिशांडिल्यविद्यादीनि एतेषांनि
त्यादीनांबुद्धिशुद्धिःपरंप्रयोजनं उपासनानांतुचित्तैकाग्र्यंतमेतमात्मानंवे
दानुवचनेनब्राह्मणाविविदिषंतियज्ञेनदानेनतपसानाशकेनेत्यादिश्रुतेः
तपसाकल्मषंहंतीतिस्मृतेश्च नित्यनैमित्तिकप्रायश्चित्तोपासनानांत्व

वेदां॰टी॰ वांतरफलं पितृलोकसत्यलोकप्राप्तिः कर्मणा पितृलोको विद्यया देवलो
क इत्यादिश्रुतेः साधनानि नित्यानित्यवस्तुविवेक इहामुत्रार्थफलभोगवि
६ रागशमदमादिषट्कसंपत्तिमुमुक्षुत्वानि नित्यानित्यवस्तुविवेकस्तावत् ब्रह्मैव
नित्यं वस्तु ततोऽन्यदखिलमनित्यमिति विवेचनं ऐहिकानां स्रक्चंदनादिविषय
भोगानां कर्मजन्यतयाऽनित्यवत् आमुष्मिकाणामपि अमृतादिविषयभो
गानामनित्यतया तेभ्यो नितरां विरक्तिः इहामुत्रफलभोगविरागः शमदमा
द्यस्तु शमउपरतितितिक्षासमाधानमित्याख्याः तत्र शमं लक्षयति शमस्ता
वच्छ्रवणादिव्यतिरिक्तविषयेभ्यो मनसो निग्रहः यथा तीव्रायां बुभुक्षायां ६
भोजनादन्यो व्यापारो मनसो न रोचते भोजने विलंबं च न सहते तथात्र

क्चंदनादिविषयेष्वत्यंतमरुचिः तत्त्वज्ञानसाधनेषु श्रवणमननादिषु अत्यंत
मभिरुचिर्जायते तदा पूर्ववासनाबलात्स्रक्चंदनादिसान्निध्ये उद्भूय स्रक्चंद
नादिविषयेषु गम्यमानं मनोऽनेनांतःकरणवृत्तिविशेषेण निगृह्यते स वृत्ति
विशेषः शम इत्यर्थः इदानीं दमस्य लक्षणमाह दमो बाह्येंद्रियनिग्रहणा
तद्व्यतिरिक्तविषयेभ्यो निवर्तनं ज्ञानसाधनश्रवणादिसाधनेभ्यो विल
क्षणेषु शब्दादिविषयेषु प्रवर्तमानानि श्रोत्रादीनि बाह्येंद्रियाणि येन वृत्ति
विशेषेण निवर्त्यंते स दम इत्यर्थः इदानीमुपरतेर्लक्षणमाह निवर्तितानां
तेषां तद्व्यतिरिक्तविषयेभ्य उपरमणमुपरतिः निगृहीतानामेव तेषां
बाह्येंद्रियाणां श्रवणादिसाधनव्यतिरिक्तेषु शब्दादिविषयेषु यथा तानि

वे॰दी॰ न्द्रियाणिसर्वथानगच्छंतितथातेषांनिग्रहोयेनवृत्तिविशेषेणक्रियतेसोपर
तिरित्यर्थः उपरतेर्लक्षणांतरमाह अथवाविहितानांकर्मणांविधिनात्यागः
विहितानांनित्यादिकर्मणांविधिनाचतुर्थाश्रमस्वीकारकर्मणापरित्यागः
नाहंकर्तेतित्यवस्थानमुपरतिरित्यर्थः तितिक्षायालक्षणमाह तितिक्षा
शीतोष्णादिद्वंद्वसहिष्णुता शरीरधर्मस्यशीतोष्णादेरन्यसुखदुः
खादेश्चशरीरस्यैवनूनमशक्यत्वात्स्वप्रकाशचिद्रूपेस्वात्मनिचशीतो
ष्णादेरत्यंताभावादितिविवेकदीपेनमिथ्याभातस्यशीतोष्णादेर्द्वंद्वस्य
सहनंसातितिक्षेत्यर्थः इदानींसमाधानलक्षणमाह निगृहीतस्यमनसः
श्रवणादौतदनुगुणविषयेषुचसमाधिःसमाधानं शब्दादिविषयेभ्यो

निगृहीतस्यांतःकरणस्यश्रवणादौतदनुगुणेषुतदुपकारकेषुअमानि
त्वादिसाधनविषयेषुसमाधिर्निरंतरंतत्परेणतच्चिंतनंसमाधानमित्यर्थः
श्रद्धाद्यःस्पष्टार्थाः गुरुवेदांतवाक्येषुविश्वासःश्रद्धा मुमुक्षुत्वंमोक्षे
च्छा एवंभूतःप्रमाताधिकारी तथापूर्वोक्तसकलविशेषणविशिष्टःप्रमा
ताधिकारीत्यर्थः अस्मिन्नर्थेश्रुतिंप्रमाणयति शांतोदांतइत्यादिश्रु
तेः उक्तंच प्रशांतचित्तायजितेंद्रियायप्रहीणदोषाययथोक्तकारिणे
गुणान्वितायानुगतायसर्वदाप्रदेयमेतत्सकलंमुमुक्षवेइति यथोद्देशं
विषयंनिरूपयति विषयोजीवब्रह्मैक्यंशुद्धचैतन्यंप्रमेयं तत्रैववेदांतानां

वेदा. ६१ तात्पर्यात् अविद्याध्यारोपितसर्वज्ञत्वकिंचिज्ज्ञत्वादिविरुद्धधर्मपरि
त्यागेनावशिष्टं शुद्धचैतन्यं ज्ञेयस्वरूपमेव सर्वेषां वेदांतवाक्यानां विषय
इत्यर्थः क्रमप्राप्तसंबंधं लक्षयति संबंधस्तु तदैक्यप्रमेयस्य तत्प्रतिपाद
कोपनिषत्प्रमाणस्य च बोध्यबोधकभावलक्षणः बोध्यबोधकभाव इति
बोध्यस्य ब्रह्मात्मैक्यस्वरूपस्य बोधकस्य वेदांतशास्त्रस्य च बोध्यबोध
कभाव एव संबंध इत्यर्थः अवशिष्टं प्रयोजनमाह प्रयोजनं तु तदैक्यप्रमेय
गताज्ञाननिवृत्तिः स्वस्वरूपानंदावाप्तिश्च ब्रह्मात्मैकत्वलक्षणचिन्मात्र
गताज्ञानतत्कार्यसकलप्रपंचनिवृत्तिः पुनरुत्पत्त्यभावरूपा स्वस्वरूपा
खंडानंदप्राप्तिः फलमित्यर्थः ननु लोके प्राप्तस्य क्रियासाध्यस्य स्वर्गादेः

पुरुषार्थत्वेन फलं दृष्टं अत्र तु नित्यप्राप्तस्यात्मस्वरूपस्य क्रियासाध्यता
भावेन पुरुषार्थत्वाभावात् कथं फलत्वमिति चेन्न तस्यैव पुरुषार्थत्वं निय
मात् यथा लोके कस्यचिद्विस्मृतकंठमणेस्तत्प्रयुक्तशोकाग्निसंदह्यमा
नस्याप्तोपदेशानंतरकाले स्वकंठगतचामीकरप्राप्तेरपि पुरुषार्थत्वात्फ
लत्वं दृष्टं एवमत्रापि नित्यप्राप्तस्यात्मन अज्ञानमोहांधकारावृतत्वेन विस्मृतस्वस्व
रूपस्य पुरुषस्य गुरूक्तश्रुतिवाक्यश्रवणानंतरं अज्ञानमोहांधकारनिवृत्तौ
सत्यां स्वयंप्रकाशमानचिद्रूपस्य सिद्धस्यैवात्मनः फलत्वमुपचर्यते इति भावः
उक्तेऽर्थे श्रुतिं प्रमाणयति तरति शोकमात्मवित् ब्रह्मविद्ब्रह्मैवेत्यादिश्रुतेः अधुना
शास्त्रारंभनिमित्ताधिकार्यादिनिरूपणानंतरं शास्त्रमारंभं प्रस्तौति अपवा

वेदां॰टी॰ लक्षितस्याधिकारिणः कर्तव्यं दर्शयति॰ अयमधिकारी जन्ममरणादिसंसा
रानलसंतप्तो दीप्तशिरा जलराशिमिवोपहारपाणिः श्रोत्रियं ब्रह्मनिष्ठं गुरुमुपस
९ त्य तमनुसरति उक्तलक्षणलक्षितो बुद्धिसंनिहितोधिकारी गुरुमुपसरतीत्य
र्थः ननु संसारासक्तचित्तस्य विषयलोलुपस्यार्तिरहितस्य गुरूपसर्पणं
मयुक्तमित्याशंक्याह संसारानलसंतप्त इति॰ संतापहेतुमाह जननेति॰
आदिशब्देनाध्यात्मिकादयो गृह्यंते अग्निदग्धमस्तको दाहनिवृत्तिकामो यथा॰
शीतलं जलराशिमनुसरति॰ तथा संसारतापत्रयसंदह्यमानस्तन्निवृत्ति
कामः स्वस्य रूपं जिज्ञासुः संसारनिवर्तकं श्रोत्रियं ब्रह्मनिष्ठं करतला ९
मलकवत्स्वप्रकाशात्मस्वरूपसमर्पकं गुरुं समीपं गत्वा अनुसर

ति वाङ्मनःकायकर्मभिः सेवत इत्यर्थः अस्मिन्नर्थे श्रुतिमुदाहरति॰ समित्पा
णिः श्रोत्रियमित्यादिश्रुतेः अथ गुरुकृत्यमाह स परमकृपयाध्यारोपापवाद
न्यायेनैनमुपदिशति स पूर्वोक्तो गुरुरेनं शिष्यमुपदिशतीत्यन्वयः परमरह
स्यमपि ब्रह्मस्वरूपं कस्मादुपदिशतीत्यत आह कृपयेति॰ कृपाव्यतिरे
केण साधनान्तराभावादित्यर्थः नन्वखंडस्य ब्रह्मस्वरूपस्यागोचरत्वेनो
पदेष्टुमशक्यत्वात्कथमुपदिशतीत्यत आह॰ अध्यारोपेति॰ अखंडब्रह्म
स्वरूपस्य विधिमुखमुपदेष्टुमशक्यत्वेपि नेह नानास्ति किंचनेत्यादिश्रु
तिमनुसृत्य अविद्यारोपितमिथ्यानानापदार्थमुखेनोपलक्षितं अखं
डचैतन्यमेव पुनः सत्यं ज्ञानमनंतं ब्रह्मेत्यादिश्रुतिमनुसृत्य लक्षणयावि॰

वे॰ टी॰ विधिमुखेनाप्युपदिशतीत्यतिभावः तत्र श्रुतिराह तस्मै स विद्वानुपसन्नाय
प्राहेत्यादिश्रुतेः अस्मिन्नर्थे लौकिकदृष्टान्तमाह अपसर्पभूतायां
१० रज्जौ सर्पारोपवद्वस्तुन्यवस्त्वारोपोध्यारोपः व्यावहारिकेवस्तुत्वेनाभि
मते रज्जौ अवस्तुभूतसर्पारोपो नाम रज्ज्ववच्छिन्नचैतन्यस्थानन्तविद्यास
र्पज्ञानाभासकारेण परिणममाना सर्पाकारेण विवर्त्तते स विवर्त्तो रज्ज्व
वच्छिन्नचैतन्यनिष्ठाविद्योपादानत्वेन नायं सर्पः किंतु रज्जुरिति विशे
षदर्शनोत्तरकालीनाधिष्ठानरज्जुसाक्षात्कारेण रज्ज्वज्ञाननिवृत्तौ
सर्पज्ञानं निवर्त्तते इत्यर्थः उक्तमर्थं दार्ष्टान्तिके योजयति वस्तुसच्चि १०
दानंदाद्वयं ब्रह्म कालत्रयानपायी आत्मैव वस्तुशब्दार्थः तत्रावस्तुस्व

रूपमाह अज्ञानादिसकलजडसमूहोवस्तु अज्ञानतज्जन्यव्योमादे
र्मिथ्यात्वाद्दृश्यत्वात्सावयवत्वाद्विकारित्वात्सापेक्षसिद्धिकत्वादित्यादि
हेतुभिरवस्तुत्वमित्यर्थः एतदेव विस्तरेण प्रतिपादयितुमज्ञानस्वरूपं ता
वदाह अज्ञानं तु सदसद्भ्यामनिर्वचनीयं त्रिगुणात्मकं ज्ञानविरोधिभा
वरूपं यत्किंचिदिति वदंति किमिदमज्ञानं सद्रूपमसद्रूपं वा नाद्यस्तस्य
शशविषाणतुल्यत्वेन तुच्छत्वात् नापि द्वितीयः असतः कारणत्वानुपपत्ते
रित्यादिहेतुभिः सत्वेनासत्वेन वा निरूपयितुं न शक्यत इत्याह अनि
र्वचनीयमिति ननु ज्ञानस्यानिर्वचनीयत्वे सर्वज्ञातुमशक्यत्वात्तन्निर्वचनीयमिति ननु
भावप्रसंगमाशंक्याह त्रिगुणात्मकमिति अजामेकामित्यादिश्रुतिभिः

वे·सि· सत्त्वरजस्तमोगुणात्मकत्वप्रतिपादनादित्यर्थः नन्वेवमज्ञस्याज्ञानस्य
श्रुतिप्रसिद्धस्य व्योमादिरूपेण विततस्य सत्त्वबाधासमानत्वेन संसारानि
११ वृत्तिमाशंक्याह ज्ञानविरोधीति एतादृशमप्यज्ञानमात्मसाक्षात्कारेण नि
वर्तत इत्यर्थः तदुक्तं भगवता दैवी ह्येषा गुणमयी मम माया दुरत्यया मामेव
ये प्रपद्यंते मायामेतां तरंति ते इति ज्ञानाभाव एवाज्ञानमिति तार्किकम
तं निराकरोति भावरूपमिति त्रिगुणात्मकभावरूपत्वेपि इदमित्थमेवेति
पिंडीकृत्य प्रदर्शयितुं न शक्यत इत्याह यत्किंचिदिति किमप्यघटि
तघटनापटीय इत्यर्थः अनिर्वचनीयानादिभावरूपाज्ञानसद्भावेऽनुभ ११
वमेवोदाहृत्य दर्शयति अहमज्ञ इत्यनुभवात् अहमज्ञोहमन्यं न जाना

मीत्यपरोक्षावभास एव प्रमाणमित्यर्थः तस्यैवोपष्टंभकत्वेन श्रुतिमुदाहरति
देवात्मशक्तिं स्वगुणैर्निरूढामित्यादिश्रुतेः अज्ञानं विश्वजले इदमिति समष्टि
व्यष्ट्यभिप्रायेणैकमनेकमिति च व्यवह्रियते वस्तुतोज्ञानस्यैकत्वेपि सम
ष्ट्यभिप्रायेणैकमिति व्यवह्रियते व्यष्ट्यभिप्रायेणानेकमित्यर्थः एतदेव प्रप
ञ्चयितुं प्रतिजानीते तथाहि यथा वृक्षाणां समष्ट्यभिप्रायेण वनमित्येकत्वव्य
पदेशः यथा बहूनां वृक्षाणां समुदायविवक्षया वनमित्यनेकत्वव्यपदेशः य
था वा बहूनां नद्यादिजलानां समुदायविवक्षया जलाशय इत्येकत्वव्यपदेशः त
थांतःकरणोपाधिभेदेन नानात्वेन प्रतीयमानां जीवगताज्ञानानां समुदाय
विवक्षयाज्ञानमित्येकत्वव्यपदेश इत्यर्थः अस्मिन्नर्थे श्रुतिं प्रमाणयति
अजामेकामित्यादिश्रुतेः नानाजीवगतनिकृष्टांतःकरणव्यष्ट्युपाध्यपेक्ष

वेदां·टी· यासमष्ट्युपाध्येरस्य वैलक्षण्यं दर्शयति· इयंसमष्टिरुत्कृष्टोपाधितया विशुद्ध
सत्वप्रधाना द्विगतरागादिदोषसकलकार्यप्रपंचस्यजगत्कारणस्य तस्या
१२ ज्ञानस्यसमष्टिरुत्कृष्टोपाधित्वेन विशुद्धसत्वप्राधान्यमितिभावः य
यथावा जलानांसमष्ट्यभिप्रायेण जलाशय इति तथा नानात्वेनप्रतिभास
मानजीवगताज्ञानानांसमष्ट्यभिप्रायेण तदेकत्वव्यपदेशः एतत्समष्ट्युपा
धिद्वारेणेश्वरचैतन्यंलक्षयति· तदेतदुपहितंचैतन्यंसर्वज्ञत्वसर्वेश्वरत्वस
र्वनियंतृत्वादिगुणकमव्यक्तमंतर्यामीजगत्कारणमीश्वर इति च व्यपदि
श्यते एतत्समष्ट्यज्ञानोपलक्षितंचैतन्यं सर्वस्य चराचरात्मकप्रपंचस्य
साक्षित्वेनसर्वज्ञ इत्युच्यते सर्वेषांजीवानांकर्मानुरूपेशितृत्वेनफल १२
दातृत्वेनेश्वर इत्युच्यते तथासर्वेषांजीवानां अंतर्हृदयेस्थित्वा बुद्धि

नियामकत्वेनांतर्यामीत्युच्यते सर्वस्यचराचरात्मकप्रपंचस्यविवर्ताधिष्ठा
नत्वेनजगत्कारणत्वमितिव्यपदिश्यत इत्यर्थः तस्मिन्नर्थेयुक्तिमाह सकला
ज्ञानावभासकत्वात् अत्रप्रमाणमाह यःसर्वज्ञःसर्वविदितिश्रुतेः इदानी
तस्यैवेश्वरस्यसमुदायोपाधिरेवकारणशरीरत्वमानंदमयकोशत्वं सुषुप्त्य
वस्थावैशिष्ट्यं चलभत इत्याह ईश्वरस्येयंसमष्टिरखिलकारणत्वात्कार
णशरीरमानंदप्रचुरत्वात्कोशवदाच्छादकत्वाच्चानंदमयःकोशः कारण
शरीरत्वेहेतुमाह अखिलेति· आनंदमयत्वेहेतुमाह आनंदप्रचुरत्वादि
ति· कारणावस्थायांप्रकृतिपुरुषमात्रव्यतिरिक्तस्य स्थूलकार्यप्रपंच
स्यैवाभावादानंदबाहुल्यमिति· कोशत्वेयुक्तिमाह आच्छादकत्वादिति
शरीराच्छादकचर्मवदात्माच्छादकत्वादज्ञानस्यकोश इति व्यवहार इत्यर्थः

वे. धी सर्वोपरमत्वात्सुषुप्तिः सर्वस्य स्थूलसूक्ष्मोपाधेः कारणोपाधौ लीनत्वात्सु
षुप्तित्वमित्यर्थः ननु स्थूलसूक्ष्मप्रपंचलयस्थानस्य कथं सुषुप्तित्वमित्याशंक्य स
१२ त्राभेदत्याह अत एवास्थूलसूक्ष्मप्रपंचलयस्थानमिति चोच्यते यतः कारणा
त्मसुषुप्तित्वमत एव पंचीकृतभूतस्थूलप्रपंचस्य जाग्रदवस्थाविशिष्टस्य अपंची
कृतभूतकार्यस्य सूक्ष्मस्याप्रपंचस्य लयस्थानमिति चाप्युच्यत इत्यर्थः
समष्टिरूपाज्ञानं सप्रपंचं निरूप्येदानीं व्यष्टिभूतमज्ञानं निरूपयितुं दृष्टांतौ
तावद्दर्शयति यथा वनस्य व्यष्ट्यभिप्रायेणेति तथाऽज्ञानस्य व्यष्ट्यभिप्राये
णतदनेकत्वव्यपदेशः यथा बहुवृक्षसमुदायस्य वनत्वेनरूपेणैकत्वव्यव
हारेपि प्रत्येकवृक्षविवक्षया भूतादयो बहवो वृक्षास्तिष्ठंतीति बहुत्वव्यवहा १३
रः यथा वापीकूपतडागादिषु समुदायविवक्षया जलाशय इत्येकत्वव्यवहारे

पि प्रत्येकं वाप्यादिविवक्षया बहूनि जलानि तिष्ठंतीति बहुत्वव्यवहारः तथास
कलप्रपंचकारणस्याज्ञानस्य समुदायरूपेणैकत्वेपि अहंकारादिकारणीभूता
नां जीवगताज्ञानानां प्रत्येकं विवक्षया बहुत्वव्यवहार इत्यर्थः अस्मिन्नर्थे श्रुतिं
प्रमाणयति इंद्रो मायाभिः पुरुरूप ईयत इत्यादिश्रुतेः ननु तथाप्येकस्यैवा
ज्ञानस्य तदवच्छिन्नचैतन्यस्य वा व्यष्टिसमष्टिता कुत इत्यत आह अत्र व्यस्त
समस्तव्यापित्वेन व्यष्टिसमष्टिताव्यपदेशः भेदविवक्षया व्यष्टित्वं मृद्धटवत्
अभेदविवक्षया च समष्टित्वं मृत्पिंडवदित्यर्थः तत्र महाप्रलयकालीनसमष्टि
भूतविशुद्धसत्त्वप्राधान्यायाः मूलप्रकृतेः सकाशाद्दैनंदिनप्रलयकालेन व्यष्ट्यु
पाधिभूतजीवप्रकृतेर्भेदं दर्शयति इयं व्यष्टिर्निकृष्टोपाधितया मलिनसत्त्वप्र
धानायाऽइयं जीवगतासुषुप्त्यवस्था प्रलयाहंकाराधिविशेषसंस्कारादिरूपा निकृष्टो

वे॰ टी॰ पाधित्वेन मलिनसत्त्वप्रधानेत्यर्थः अनेनोपाधिना प्राज्ञचैतन्यं लक्षयति एत
दुपाहितं चैतन्यं मल्पज्ञत्वादनीश्वरत्वादिगुणकं प्राज्ञ इत्युच्यते अत्रोपपत्ति
१५ माहः एकाज्ञानावभासकत्वात् ईश्वरगतमूलाज्ञानस्य जीवगतेहंकारादि
विक्षेपसंस्कारादिरूपाज्ञानस्य तदवभासकेश्वरजीवचैतन्ययोरप्येकत्वमि
त्यर्थः सोऽशुद्धजीवचैतन्यस्य प्राज्ञत्वं साधयति अस्य प्राज्ञत्वमस्पष्टोपाधि
तया अनतिप्रकाशकत्वादस्याप्ययं महंकारादिकारणत्वात्कारणशरीरमानं
दप्रचुरत्वादेव हेतोरानंदमयकोशः संस्काररूपास्पष्टोपाधितया तदावृतत्वे
नातिप्रकाशत्वाभावात्प्राज्ञत्वमस्येत्यर्थः यथा लिंगकारणेश्वरोपाधेः
कारणशरीरत्वं आनंदप्रचुरत्वेन चानंदमयकोशत्वं कारणादृष्टत्वेन च को १५
शत्वं तथा एतत्सर्वतारतम्येन प्राज्ञचैतन्येप्यतिदिशति अहंकारादीति

प्रलयकाले हिरण्यगर्भादिप्रपंचोत्पादकेश्वरमूलप्रकृतिवत्सुषुप्तिकालेऽहंकारादि
शरीरोत्पादकसंस्कारमात्रावशिष्टजीवगताज्ञानस्यापि कारणशरीरत्वे इंद्रिय
तद्विषयाभावेन व्यासंगाभावादानंदबाहुल्यादात्माच्छादकत्वात्कोशत्वं च युक्त
मितिभावः ननु स्थूलसूक्ष्मशरीरलयस्थानस्य कथं सुषुप्तिशब्दवाच्यत्वमित्या
शंक्य पूर्ववत्संज्ञाभेदो न वस्तुभेद इति वक्तुं तत्र युक्तिमाह सर्वोपरमत्वात्सुषु
प्तिः अत एव स्थूलसूक्ष्मशरीरलयस्थानमिति चोच्यते पंचीकृतस्थूलशरीरस्य
व्यावहारिकस्यापंचीकृतसूक्ष्मशरीरे प्रातिभासिके प्रविलापितत्वात्तस्यापि
प्रातिभासिकस्य स्वाप्नप्रपंचस्य स्वकारणेऽज्ञाने लीनत्वात्सर्वोपरतिरित्यर्थः
तथा चोक्तं लये फेनस्य तद्धर्मा द्रवाद्याः स्युस्तरंगके तस्यापि विलये नीरे
तिष्ठंत्येते यथा पुरा व्यावहारिकजीवस्य लये स्यात्प्रातिभासिके तल्लये स

वे.टी. चिदानंदाःपर्यायस्यंतिसाक्षिणीति २ ननुप्रलयकालेसुषुप्तिकालेचांतःकरण
१५ तद्वृत्त्यभावेनानंदग्राहकाभावादानंदप्राचुर्यसद्भावेप्रमाणाभावमाशंक्यपरिहरति
तदानीमेतावीश्वरप्राज्ञौचैतन्यप्रदीप्ताभिरतिसूक्ष्माभिरज्ञानवृत्तिभिरानंदम
नुभवतः यथास्वच्छत्वेनांतःकरणस्यवृत्तिरंगीक्रियतेतथाचैतन्यदीप्ताज्ञानस्या
पिसूक्ष्मावृत्तयःस्वीक्रियंते तथोचेश्वरः स्वकीयाज्ञानवृत्तिभिःस्वात्मानंदवा
ऽत्यंतारलम्येनानुभवतीतिभावः अत्रैवोपष्टंभकत्वेश्रुतिमवतारयति आनंद
भुक्चेतोमुखःप्राज्ञइत्यादिश्रुतेः उत्तरकालीनसुखपरामर्शानुपपत्तिरपि
पूर्वानुभूतसुखवाऽत्यानुभवसद्भावेप्रमाणमित्याह सुखमहमस्वाप्सं न
किंचिदवेदिषमित्युत्थितस्यपरामर्शोपपत्तेश्चसुखमहमस्वाप्समित्यादंदपरा १५
मर्शः नकिंचिदवेदिषमितिज्ञानंपरामर्शः तथाचसुषुप्तिदशायांप्रलयकाले

चप्राज्ञेश्वरावज्ञानवृत्तिभिरानंदमनुभवतः एवत्यर्थः इदानीमीश्वरगतमूलाज्ञा
नस्यजीवगतसंस्कारमात्रावशिष्टाज्ञानस्यचसमष्टिव्यष्टित्वप्रायेणाभेदध्यानेपि
वस्तुभेदोनास्तीत्येतत्सदृष्टांतमाह अनयोःसमष्टिव्यष्ट्योःवनवृक्षयोरिवज
लाशयजलयोरिववाअभेदः उक्तोपाधिद्वयद्वारेणेश्वरप्राज्ञयोरप्यभेदंदृष्टांतमु
खेनदर्शयति एतदुपहितयोरीश्वरप्राज्ञयोरपिवनवृक्षावच्छिन्नाकाशयोरिवज
लाशयजलगतप्रतिबिंबाकाशयोरिववाभेदः ईश्वरस्यवनावच्छिन्नाकाशवत्त्वि
वत्प्राज्ञस्यवृक्षावच्छिन्नाकाशवत्त्वंतथास्थूलजलाशयोरिवपाध्यवच्छिन्ना
काशवत्तद्गतप्रतिबिंबाकाशवच्चकारणोपाध्यवच्छिन्नेश्वरकार्योपाध्यवच्छिन्न
प्राज्ञस्यचवस्तुतोभेदएवत्यर्थः तत्रप्रमाणमाह एषसर्वेश्वरइत्यादिश्रुतेः

वे.दी. तथा चोक्तमाचार्यैः कार्योपाधिरयं जीवः कारणोपाधिरीश्वरः कार्यकारणतां
१६ हित्वा पूर्णबोधोऽवशिष्यत इति उपाधिद्वयावच्छिन्नौ प्राज्ञेश्वरौ सप्रपंचं निरूप्ये
दानीमनवच्छिन्नं तुरीयं चैतन्यं तल्लक्षयति वनवृक्षतदवच्छिन्नाकाशयोर्जलाश
यजलगतप्रतिबिंबाकाशयोर्वा आधारानुपहिताकाशवदनयोः मूलाज्ञानसंस्कार
मात्रावशिष्टाज्ञानविशिष्टचैतन्ययोरज्ञानतदुपहितचैतन्ययोराधारभूतं यदनु
पहितं चैतन्यं तत्तुरीयमित्युच्यते यथा स्थूलवनोपाध्यवच्छिन्नाकापेक्षयासूक्ष्मो
वृक्षोपाध्यवच्छिन्नाकाशापेक्षया च महाकाशस्य तदुभयाधारतयाऽनवच्छिन्नत्वा
त्तुरीयत्वं तथा कारणोपाधितदवच्छिन्नचैतन्यद्वयापेक्षया तदाधारभूतं यदन
वच्छिन्नं सर्वव्यापि चैतन्यं विशुद्धं तुरीयमुच्यत इत्यर्थः अस्मिन्नर्थे श्रुतिसंवादयु १६
ति शिवमद्वैतं चतुर्थं मन्यंते इत्यादिश्रुतेः एतदेव विशुद्धं चैतन्यं तदेव पूर्वोक्त

चैतन्यद्वयेन सहैकत्वविवक्षायां महावाक्यस्य वाच्यत्वं लभते भेदविवक्षायां च ल
क्ष्यत्वं लभत इत्याह इदमेव तुरीयं शुद्धं चैतन्यमज्ञानादितदुपहितचैतन्याभ्यां
तप्तायःपिंडवदविविक्तं सन्महावाक्यस्य वाच्यं विविक्तं सल्लक्ष्यमिति चोच्यते त्र
याणां चैतन्यानां चैतन्येन रूपेणैकत्वेऽपि अवच्छिन्नानवच्छिन्नत्वेन रूपेण वाच्यल
क्ष्यत्वसंभवत इति भावः अथेदानीं स्वप्रकाशचिद्रूपस्यात्मनः कथं कुंठितप्रकाश
त्वं कथं वाऽसंगोदासीनस्यात्मनः आकाशादिप्रपंचजनकत्वमित्येतन्महाविरोध
परिहारायाज्ञानस्य शक्तिद्वयं निरूप्यते अस्याज्ञानस्यावरणविक्षेपनामकम
स्ति शक्तिद्वयं त एव नामतो निर्दिशति आवरणशक्तिस्तावत् सच्चिदानंदस्वरूप
मावृणोत्यावरणशक्तिः ब्रह्मादिस्थावरांतं जगत्कल्पनं तु द्वयेवं नामरूपात्मकं वि

वे॰ टी॰ क्षिपतिसृजतीति विक्षेपशक्तिरिति शक्तिद्वयमज्ञानस्येत्यर्थः नन्वपरिच्छिन्न
१७ स्यस्वप्रकाशचिद्रूपाखंडपरिपूर्णस्यात्मनः परिच्छिन्नेनानित्येनजडेनतमोरूपेणा
व्यापकेनाज्ञानशक्तिविशेषेणकथमावरणमित्याशंक्ययवस्तुतोज्ञानस्यात्मा
च्छादकत्वाभावेपिप्रमातृबुद्धिमात्राच्छादकत्वेनाज्ञानस्यात्माच्छादकत्वमुपचा
रादुच्यतेइत्याह आवरणशक्तिस्तावदल्पोपिमेघोनेकयोजनायतमादित्य
मंडलमवलोकयितुर्नयनपथविधायकतयायथाच्छादयतीव तथाज्ञानंप
रिच्छिन्नमपिआत्मानमपरिच्छिन्नमसंसारिणमवलोकयितृबुद्धिपिधा
क यकतयाच्छादयतीवतादृशंसामर्थ्यं यथाऽल्पोपिमेघोनेकयोजनवि
स्तीर्णमादित्यमंडलमवलोकयितृपुरुषदृष्टिमात्राच्छादकत्वेनात्मा १७
नमाच्छादयतीत्युपचारादुच्यतइत्यर्थः अस्मिन्नर्थेवृद्धसम्मतिमाह

तदुक्तं घनच्छन्नदृष्टिर्घनच्छन्नमर्कं यथामन्यतेनिष्प्रभंचातिमूढः तथा
बद्धवद्भातियोमूढदृष्टेःसनित्योपलब्धिस्वरूपोहमात्मेति अनयैवावर
णशक्त्यावच्छिन्नस्यात्मनःकर्तृत्वभोक्तृत्वसुखदुःखमोहात्मकतुच्छसं
सारसंभावनापिसंभाव्यते इयमेववारणशक्तिरात्मनोबुद्धिभेदजनक
त्वेनसंसारहेतुरितिभावः अत्रानुरूपंदृष्टांतमाह यथास्वाज्ञानेनावृतायाः
रज्जोःसर्पत्वसंभावना यदुक्तमसंगोदासीनस्यात्मनःकथंजगत्कार
णत्वमितितन्निराकर्तुंविक्षेपशक्तिस्वरूपमाह विक्षेपशक्तिस्तु यथार
ज्ज्वज्ञानंस्वावृतरज्जौस्वशक्त्यासर्पादिकमुद्भावयति एवमज्ञानमपि
स्वावृतात्मनिविक्षेपशक्त्याआकाशादिकंप्रपंचमुद्भावयति तादृशं

वे॰टी॰ सामर्थ्यं यथा रज्जुविषयकमज्ञानं सर्पमुत्पादयति तथात्मविषयकमज्ञानमपि
१८ स्वावच्छिन्ने आत्मनि विक्षेपशक्तिप्रभावेणाकाशादिप्रपंचमुत्पादयतीत्यर्थः
अस्मिन्नर्थे ग्रंथांतरसंमतिं दर्शयति तदुक्तं विक्षेपशक्तिर्लिंगादिब्रह्मांडांतं
जगत्सृजति ननु किमात्मा चराचरात्मकप्रपंचस्य निमित्तकारणमुपादानकारणं
वा नाद्यः दंडादिवत्स्वकार्यव्यापित्वं न स्यादात्मनः तत्सृष्ट्वा तदेवानुप्राविशदिति श्रु
त्या स्वकार्यव्यापित्वश्रवणान्न द्वितीयः अचेतनस्य जडस्य प्रपंचस्य चैतन्योपाद
नकत्वासंभवात् उपादानत्वे च कार्यकारणयोरभेदेन प्रपंचस्यापि चैतन्यरूपत्व
प्रसंगादनित्यत्वं न स्यादित्याशंक्य जडप्रपंचस्य प्रत्यात्मनश्चैतन्यप्राधान्येन नि
मित्तत्वं स्वाज्ञानप्राधान्येनोपादानत्वं च संभवतीत्याह शक्तिद्वयवदज्ञानोप १८
हितं चैतन्यं स्वप्रधानतया निमित्तं स्वोपाधिप्राधान्यतयोपादानं च भवति

यथाऽयस्कांतसन्निधाने जडमयं लोहं चेष्टते तथा चैतन्यसन्निधानेन जडमयम
ज्ञानं चेष्टते इत्यज्ञानविकारं प्रति चैतन्यस्य निमित्तत्वं जडाकाशादिकार्यं प्रतिमा
यायाः साक्षादुपादानत्वेन मायाविनः ईश्वरस्यापि परंपरयोपचारादुपादानत्वं न
विरुध्यते इत्यर्थः यदुक्तं चैतन्यस्य निमित्तकारणत्वे कार्यानुप्रवेशो न स्यादिति
तन्न कारणस्य कार्यानुप्रवेशनियमस्योपादानकारणविषयत्वेन निमित्तकार
णविषयत्वाभावात् तत्सृष्ट्वेत्यादिश्रुतेरप्युपादानकारणपरत्वात् यदुक्तमुपा
त्मन उपादानकारणत्वे प्रपंचस्यानित्यत्वं न स्यादिति तदपि न तस्य परिणामवि
षयत्वेन विवर्तविषयत्वाभावात् प्रपंचस्य ब्रह्मविवर्तत्वाद्विवर्तत्वं च स्वस्वरूपा
परित्यागेन स्वरूपांतरप्रदर्शकत्वं यथा रज्ज्ववच्छिन्नचैतन्यनिष्ठाज्ञानस्य र
ज्जुस्वरूपापरित्यागेनाकाशादिस्वरूपांतराकारेण प्रदर्शकत्वं एतावता

वे. टी. आकाशादिप्रपंचस्यापिमिथ्यात्वान्नचैवमज्ञानस्यमिथ्यात्वेनतत्प्रयुक्तबंध
१९ मोक्षयोरपिमिथ्यात्वप्रसंगइतिवाच्यं । इष्टापत्तेः तदुक्तंभागवते बद्धोमुक्तइ
तिव्याख्यागुणतोमेनवस्तुतः गुणस्यमायामूलत्वात्नमेमोक्षोनबंधनमिति ।
अलमितिविस्तरेणएकस्यैवात्मनोनिमित्तोपादानकारणत्वेदृष्टांतमाह यथा
लूतातंतुःस्वकार्यंप्रतिस्वप्रधानतयानिमित्तंस्वशरीरप्रधानतयोपादानंचभव
ति । यथालूतातंतुःस्वोत्पाद्यमानतंतुलक्षणंकार्यंप्रतिस्वचैतन्यप्रधानतया
निमित्तंचैतन्यसन्निधानव्यतिरेकेणजडस्यदेहस्यमृतशरीरजनंतुजनकत्वासं
भवात्स्वशरीरप्राधान्येउपादानंचभवति । शरीरस्यसाक्षात्तंतूपादानत्वेनतदव
च्छिन्नचैतन्यस्यापिह्युपादानत्वेनोपचारात् एवमीश्वरस्यापिस्वचैतन्यप्रधान १९
तयानिमित्तत्वंस्वोपाधिप्रधानतयोपादानत्वंचभवतीत्यर्थः इदानींविक्षेप

शक्तिकृत्यमाह तमःप्रधानविक्षेपशक्तिमदज्ञानोपहितचैतन्यादाकाशः आका
शाद्वायुः वायोरग्निः अग्नेरापः अद्भ्यः पृथिवीचोत्पद्यते आकाशादेर्जडत्वात्तमोगुण
प्रधानविक्षेपशक्तियुक्ताज्ञानावच्छिन्नचैतन्यस्यैवाकाशादिप्रपंचजनकत्वमिति
भावः अस्मिन्नर्थेश्रुतिंप्रमाणयति । एतस्मादात्मनःआकाशःसंभूतइतिश्रुतेः
एतेनार्थात्सांख्यनैय्यायिकपक्षौनिरस्तौ शंकरज्ञानस्यशक्तिमत्परतंत्रत्वात्स्वतं
त्रस्यतस्यकेवलस्यजडस्याज्ञानस्यजगत्कारणत्वानुपपत्तेः ईक्षतेर्नाशब्दं वचनानु
पपत्तेश्चनानुमानमित्यादिन्यायैर्निरस्तत्वाच्च परमाणोरप्युक्तदोषग्रासात्ता
सानपायात् अभिन्ननिमित्तोपादानप्रतिपादकश्रुतिस्मृतिन्यायविरोधाच्च यतो
वाइमानिभूतानिजायंतेयेनजातानिजीवंतियत्प्रयंत्यभिसंविशंति सदेवसोम्येद
मग्रआसीत् एतस्माज्जायतेप्राणोमनःसर्वेंद्रियाणिच अहंसर्वस्यप्रभवोमत्तः

सर्वं प्रवर्तते बीजं मां सर्वभूतानामित्यादिश्रुतिस्मृतिभिरीश्वरस्यैव जगत्कारणत्वप्र
तिपादनात् नन्वाकाशादिप्रपंचोत्पादकं चैतन्यावच्छेदकाज्ञाने कुतस्तमःप्राधान्यमि
त्याशंक्याह तेषु जाड्याधिक्यदर्शनात्तमःप्राधान्यं तत्कारणस्य कारणगुणा हि कार्य
गुणानारभंत इति न्यायादिति भावः ननु त्रिगुणात्मकत्वादज्ञानस्य कथं तमोगुण
मात्रप्राधान्येनाकाशादिजनकत्वमित्याशंक्याह इदानीं सत्वरजस्तमांसि कार
णगुणक्रमेण तेष्वाकाशादिषूत्पद्यंते तदानीमुत्पत्तिवेलायां सत्वादयस्त्रयोपि गु
२ णास्तेष्वपि कारणप्रक्रमन्यायेन तेष्वाकाशादिषु पंचभूतेषूत्तरोत्तराधिक्येन जा
यंत इत्यर्थः इमान्येव सूक्ष्मशरीरादिकारणभूतापंचीकृतानि सूक्ष्मरूपपंचभूत
तन्मात्राणीत्युच्यंत इत्याह तान्येव सूक्ष्मभूतानि तन्मात्राण्यपंचीकृतानि चोच्यंते २०
तदुक्तं पंचप्राणमनोबुद्धिदशेंद्रियसमन्वितं अपंचीकृतभूतोत्थं सूक्ष्मांगं भोगसा
धनमिति वचनादपि अपंचीकृतभूतेभ्यो ऽपंचीकृतसूक्ष्मशरीराणि पंचीकृ

तस्थूलभूतेभ्यः स्थूलशरीराणि चोत्पद्यंत इत्याह एतेभ्यः सूक्ष्मशरीराणि स्थूलभू
तानि चोत्पद्यंते सूक्ष्मशरीरस्वरूपभूतानवयवानाह अवयवास्तु ज्ञानेंद्रियपंचकं
बुद्धिमनसी कर्मेंद्रियपंचकं वायुपंचकं चेति ज्ञानेंद्रियाणि श्रोत्रत्वक्चक्षुर्जिह्वाघ्रा
णाख्यानि सात्विकांशादाकाशाच्छ्रोत्रमुत्पद्यते सात्विकांशाद्वायोस्त्वगिंद्रियं सात्वि
कांशात्तेजसश्चक्षुः सात्विकांशाज्जलाज्जिह्वा सात्विकांशात्पृथिव्याः सकाशाद्घ्रा
णेंद्रियं चेति क्रमेणोत्पद्यंत इत्याह एतान्याकाशादीनां सात्विकांशेभ्यो व्यस्तेभ्यः पृथ
क्पृथक्क्रमेणोत्पद्यंते बुद्धेर्लक्षणमाह बुद्धिर्नाम निश्चयात्मिकांतःकरणवृत्तिः अले
नाहमिति निश्चयात्मिकैवांतःकरणवृत्तिरेव बुद्धिरित्यर्थः मनसो लक्षणमाह मनो ना
म संकल्पविकल्पात्मिकांतःकरणवृत्तिः अहं चिद्रूपो देहो वेति संशयात्मिकांतःकर
णवृत्तिः अहं चिद्रूपो देहो वेति संशयात्मिकांतःकरणवृत्तिरेव मन इत्यर्थः स्मरणा

वे॰ टी॰ त्मकाचित्तस्यगवात्मकाहंकारस्यचबुद्धिमनसोरंतर्भाव इत्याह॥ अनयोरेवचित्ताहं
कारयोरंतर्भावः यद्यप्यंतःकरणत्वेनचतुर्णामेकत्वंतथाप्येकस्यैवपुरुषस्यैपाचकःपा
२१ ठकइत्यादिवृत्तिभेदोक्तेदेवदेकस्याप्यंतःकरणस्यवृत्तिनिश्चयसंशयस्मरणाहंकार
विषयभेदैर्बुध्यादिभिदइत्यर्थः बुध्यादीनामुत्पत्तिप्रकारंदर्शयति एतेपुनराकाशादि
गतसात्त्विकांशेभ्योमीलितेभ्यउत्पद्यंते एतेषांचतुर्णांसात्त्विकांशेभ्योभूतेभ्यः उत्पत्तौ
निमित्तमाह एतेषांप्रकाशात्मकत्वात्सात्त्विकांशकार्यत्वं बुध्यादीनांप्रकाशात्मक
त्वात्सात्त्विकांशभूतकार्यत्वमित्यर्थः बुद्धेर्विज्ञानमयकोशत्वंदर्शयति इयंबुद्धिर्ज्ञाने
न्द्रियैः सहिताविज्ञानमयकोशोभवति॰ बुद्धेःसत्वकार्यत्वात्ज्ञानेंद्रियायसाहित्येन
प्रकाशाधिक्याद्विज्ञानमयत्वं आत्माच्छादकत्वाच्चकोशत्वमित्यर्थः विशुद्धबुद्धिप्र
तिबिंबितचिदात्मजीवत्वंदर्शयति॰ अयंकर्तृत्वभोक्तृत्वसुखित्वदुःखित्वाद्यभि २१
मानित्वेनेहपरलोकगामीव्यावहारिकजीवइत्युच्यते तद्धायःपिंडवद्बुध्यारोपि

तंचैतन्यंवस्तुतोकर्तृभोक्तृनित्यानंदापरिच्छिन्नमक्रियमपिभोक्तृत्वकर्तृत्व
दुःखित्वपरिच्छिन्नत्वक्रियावत्वाद्यभिमानेनस्वर्गादिलोकांतरगामित्वव्यावहारि
कजीवत्वंचलभतइत्यर्थः मनोमयकोशंनिरूपयति मनस्तुकर्मेंद्रियैःसहितंसन्म
नोमयकोशोभवति सत्वगुणप्रधानंमनस्तत्वगुणांशेभ्योजातश्रोत्रादिज्ञानें
द्रियैरेवसहितंसन्मनोमयकोशइत्यर्थः अत्रतुमनसःसत्वोपहितरजोविकारेच्छारूप
त्वात्संकल्पविकल्पात्मकत्वेनबुध्यपेक्षयाज्ञानाधिक्याभावान्मनोमयत्वंआत्माच्छाद
कत्वात्कोशत्वमितिभावः कर्मेंद्रियाण्युद्दिशति कर्मेंद्रियाणिवाक्पाणिपादपायू
पस्थाख्यानि एतेषामुत्पत्तौसाधनापेक्षामाह एतानिपुनराकाशादीनांरजो
ऽंशेभ्योभूतेभ्यःपृथक्पृथक्क्रमेणोत्पद्यंते भूतानांत्रिगुणत्वेपिरजोगुणबहुलेभ्यो
भूतेभ्योवागादीनिपृथक्पृथक्क्रमेणजायंते रजोगुणप्रधानादाकाशाद्वागुत्प
द्यते रजोगुणप्रधानाद्वायोःपाणींद्रियं रजोगुणप्रधानादग्नेःपादेंद्रियं रजो

वे॰ धि॰ ०गुणप्रधानज्जलात्पार्थिवेंद्रियं रजोगुणप्रधानात्पार्थिव्यागुणेंद्रियमुत्पद्यत इ
त्यर्थः वायूनुद्दिशति वायवः प्राणापानव्यानोदानसमानाः यथोद्देशं प्राणस्य लक्षण
२२ माह॰ प्राणो नाम प्रागानवान्नासाग्रस्थानवर्ती ऊर्ध्वगमनशीलो नासाग्रस्थायी
वायुः प्राण इत्यर्थः अपानस्य लक्षणमाह अपानो नामावागानवान् पाय्वादिस्था
नवर्ती अधोगमनशीलः पाय्वादिस्थायी वायुरपान इत्यर्थः व्यानस्य लक्षणमा
ह॰ व्यानो नाम वि— नवान् अखिलशरीरवर्ती स्थायी वायुर्व्यान इत्यर्थः उदानस्य
लक्षणमाह उदानो नाम कंठस्थानीय ऊर्ध्वगमनवान् उत्क्रमणवायुः ऊर्ध्वमुत्क्रम
णशीलः कंठस्थायी वायुरुदान इत्यर्थः समानो नाम शरीरमध्यगत अशितपी
तान्नसमीकरणकरः शरीरमध्यगतान्नरसादिनेता वायुः समान इत्यर्थः प्राणा २२
दीनां वायुत्वेन रूपेणैकत्वेपि क्रियाभेदेन भेद इत्यर्थः कापिलमतानुसारिणः कि

पाक्तदेनान्येपि पंचवायवः संतीति वदंतीत्याह॰ केचित्तु नागकूर्मकृकलदेवदत्तधनं
जयाख्याः पंचान्ये वायवः संतीति वदंति तान्येव नामानि निर्दिशति नागेत्यादि नाग
उद्गीरणकरः कूर्म उन्मीलनकरः कृकलः क्षुत्करः देवदत्तो जृंभणकः धनंजयः पोष
णकरः तथा चोक्तं उद्गारे नाग आख्यातः कूर्म उन्मीलने स्मृतः कृकलः क्षुत्कृते ज्ञेयो
देवदत्तो विजृंभणे न जहाति मृतं चापि सर्वव्यापी धनंजय इति॰ वेदांतिनस्तु नागादी
नां प्राणादिष्वंतर्भावं वदंतीत्याह॰ एतेषां प्राणादिष्वंतर्भावात् प्राणादयः पंचैवेति के
चित् प्राणादिवायूनामुत्पत्तौ कारणापेक्षयामाह एवं प्राणादिपंचकमाकाशादिग
तरजोंऽशेभ्यो मिलितेभ्य उत्पद्यते पंचीकृतपंचमहाभूतेभ्यः रजःप्रधानकेभ्यः
प्राणादयो जायंत इत्यर्थः एतेषां प्राणादीनां प्राणप्रचुरत्वात् प्राणमयत्वं आच्छा
दकत्वात् कोशत्वं च भवतीत्याह इदं प्राणादिपंचकं कर्मेंद्रियैः सहितं सत् प्राणम
यः कोशो भवति प्राणादीनां रजःप्रधानतया कार्यत्वेन निमित्तमाह अस्य क्रियात्मकत्वे

वेदां॰टी॰ न रजोंशकार्यत्वं प्राणादीनां क्रियात्मकत्वकत्वाद्रजः कार्यत्वमित्यर्थः एतेषु पंचसु
कोशेषु मध्ये विज्ञानमयमनोमयप्राणमयकोशानां क्रमेण ज्ञानेच्छाक्रियाशक्तिभेदे
२३ नैकर्तृकरणक्रियारूपत्वं दर्शयति. एतेषु कोशेषु मध्ये विज्ञानमयो ज्ञानशक्तिमान्कर्तृ
रूपः मनोमय इच्छाशक्तिमान्करणरूपः प्राणमयः क्रियाशक्तिमान् कार्यरूपः तत्र हे
तुमाहः योग्यत्वादेवमेतेषां विभाग इति वर्णयतीदमेव कोशत्रयं सूक्ष्मशरीरमिति
व्यवह्रियत इत्याहः एतत्कोशत्रयं मीलितं सत्सूक्ष्मशरीरमुच्यते अस्य समष्टि
त्वे हेतुमाह अत्राप्यखिलसूक्ष्मशरीरमेकबुद्धिविषयतया वनवज्जलाशयव
द्वा समष्टिः एकबुद्धीति चराचरप्राणिमात्रस्य यावंत्यनंतानि सूक्ष्मशरीराणि
तेषां सर्वेषां सूक्ष्मशरीराणां सूत्रात्मना हिरण्यगर्भाख्येन स्वीयैकबुध्या विषयीकृ २३
तत्वात्समष्टित्वमित्यर्थः तत्र दृष्टांतमाह वनवदित्यादि अस्यैव सूक्ष्मशरीरस्य व्य

ष्टित्वं दर्शयति अनेकबुद्धिविषयतया वृक्षवज्जलवद्वा व्यष्टिरपि भवति अनेके
षां जीवानां प्रत्येकस्य स्वस्य लिंगस्य शरीरस्य स्वस्वबुद्धिविषयत्वेनानेकबुद्धिविष
यतया व्यष्टित्वमित्यर्थः तत्र दृष्टांतमाह वृक्षवदित्याद्युक्तः समष्ट्यवच्छिन्नचैतन्य
स्य सूत्रात्मत्वादिसंज्ञां दर्शयति एतत्समष्ट्युपहितं चैतन्यं सूत्रात्मा हिरण्यगर्भः
प्राणश्चेत्युच्यते तत्र हेतुमाह सर्वत्रानुस्यूतत्वादित्यर्थः हेत्वंतरमाह ज्ञानेच्छा
शक्तिमत्कोशत्रयोपाध्यवच्छिन्नत्वादित्यर्थः विज्ञानमयादिकोशत्रयस्य सूक्ष्मश
रीरतां दर्शयति अस्यैषा समष्टिस्थूलप्रपंचापेक्षया सूक्ष्मत्वात्सूक्ष्मशरीरं वि
ज्ञानमयादिकोशत्रयं अस्य सूत्रात्मनो हिरण्यगर्भाख्यस्य विज्ञानमयादिकोशत्र
यं सूक्ष्मशरीरं अस्य स्थूलप्रपंचापेक्षया सूक्ष्मत्वादित्यर्थः अस्यैव विज्ञान
मयादिकोशत्रयस्य स्वप्नत्वे युक्तिमाहः जाग्रद्वासनामयत्वात्स्वप्नः विराट्
स्वरूपेणानुभूतस्थूलप्रपंचविषयकवासनामयत्वात्स्वप्नत्वमस्येत्यर्थः

वे॰ टी॰ अत एव स्थूलप्रपंचलयस्थानमिति चोच्यते यतः स्वप्नत्वं सूक्ष्मत्वं चातः स्वस्थू
२४ लप्रपंचलयस्थानमित्युच्यत इत्यर्थः विज्ञानमयादिसमष्ट्युपाध्यवच्छिन्नचैतन्यस्य
हिरण्यगर्भत्वं प्रतिपाद्येदानीं तद्व्यष्ट्युपलक्षितचैतन्यस्य तैजसत्वं निरूपयति ए
तद्व्यष्ट्युपहितचैतन्यं तैजसो भवति तत्र हेतुमाह तेजोमयांतःकरणोपहितत्वाद
स्यापीयं व्यष्टिः स्थूलशरीरापेक्षया सूक्ष्मत्वादिति हेतोरस्य सूक्ष्मशरीरं विज्ञानम
यादिकोशत्रयं व्यष्टिरूपं विज्ञानमयादिकोशत्रयं तैजसस्यापि सूक्ष्मशरीरमिति
दर्शयति अस्यापीति सूक्ष्मशरीरत्वे हेतुमाह स्थूलेति अस्यापि स्वप्नत्वे हेतुमा
ह जाग्रद्वासनामयत्वात्स्वप्नः विश्वचैतन्येनानुभूतस्थूलशरीरविषयकवास
नामयत्वात्स्वप्नत्वमित्यर्थः अस्यैव सूक्ष्मशरीरस्य स्थूलशरीरलयस्थानत्वे युक्ति २४
माह जाग्रद्वासनामयत्वात्स्थूलशरीरलयस्थानमिति चोच्यते यथापूर्वं प्राज्ञेश्व

रावज्ञानवृत्तिभिः सुषुप्त्यवस्थायामानंदमनुभवतः तथा हिरण्यगर्भतैजसावपि
स्वप्नावस्थायां मनोवृत्तिभिर्वासनामयान्शब्दादिविषयाननुभवत इति दर्शयति एतौ
सूत्रात्मतैजसौ तदानीं मनोवृत्तिभिः सूक्ष्मविषयाननुभवतीत्यस्मिन्नर्थे श्रुतिमु
दाहरति प्रविविक्तभुक्तैजस इत्यादिश्रुतेः इहापि विज्ञानमयादिकोशत्रयस्य स
मष्टिरूपस्य तदवच्छिन्नसूत्रात्मनश्च व्यष्टिरूपविज्ञानमयादिकोशत्रयस्य तदव
च्छिन्नचैतन्यस्य च वनवृक्षादितदवच्छिन्नाकाशादिदृष्टांतमुखेनाभेदं दर्शयति
अत्रापि समष्टिव्यष्ट्योस्तदुपहितसूत्रात्मतैजसयोर्वनवृक्षवत्तदवच्छिन्नाकाश
वच्च जलाशयजलवत्तद्गतप्रतिबिंबाकाशवच्चाभेदः समष्टिव्यष्ट्युपाध्योर्वनवृ
क्षवज्जलाशयजलवच्चाभेदः उपाधिद्वयावच्छिन्नचैतन्ययोः सूत्रात्मतैजसयोरपि
वनवृक्षावच्छिन्नाकाशवज्जलाशयजलगतप्रतिबिंबाकाशवच्चाभेद इत्यर्थः

वेदां.टी. सूक्ष्मशरीरोत्पत्तिप्रकरणमुपसंहरति एवंसूक्ष्मशरीरोत्पत्तिः अथेदानींस्थूलश
रीरोत्पत्तिंनिरूपयितुमुपक्रम्यते स्थूलभूतानितुपंचीकृतानितुशब्दः पूर्वस्मा
२५ द्वैषम्यंद्योतयतिपंचीकृतानीति अपंचीकृतसूक्ष्मभूतापेक्षयास्थूलभूतानिपंची
कृतानीत्यर्थः पंचीकरणमेवप्रतिपादयितुंप्रतिजानीते पंचीकरणंतुपंचीकर
णप्रकारमेवाह आकाशादिपंचस्वेकैकं द्विधासमंविभज्यतेषुदशसुभागेषुप्रा
थमिकान्पंचभागान् प्रत्येकंचतुर्धासमंविभज्यतेषांचतुर्णांभागानांस्व
स्वद्वितीयार्धभागपरित्यागेनभागांतरेषुयोजनं अयमर्थः सृष्टिकाले
सकलप्राण्यदृष्टवशादीश्वरप्रेरणया आकाशवायुतेजोजलान्यवनिघयास २५
हायभूतात्परमात्मनःसकाशादनुक्रमजातानितान्यपंचीकृतसूक्ष्माणि
व्यवहारासमर्थानीतिकृत्वातदीयस्थौल्यापेक्षायांव्यवहारप्राणिजात

धर्माधर्मापेक्षयैवतान्येवभूतानिपंचीकृतानिभवंतितानिचप्रत्येकंद्वैवि
ध्यमापद्यंते तेष्वाकाशादिषुदशसुभागेषुप्राथमिकान्पंचभागान्प्रत्येकंचतु
र्धासमंविभज्यस्वार्धपरित्यागेनचतुर्णांप्रत्येकंभागांतरेषुसन्निवेशेनपंची
कृतानिस्थूलानिभवंतीति अस्मिन्नर्थेवृद्धसंमति तदुक्तं द्विधाविधाय
चैकैकंचतुर्धाप्रथमंपुनः स्वस्वेतरेपंचपंचाद्वितीयांशेयोजनेपंचपंचते इति पंची
करणस्यात्रिवृत्करणप्रतिपादकश्रुत्यंतरविरोधमाशंक्यपरिहरति अस्याप्र
माण्यंनशंकनीयं त्रिवृत्करणमितिश्रुतेः पंचीकरणस्याप्युपलक्षणत्वात्तत्र
यसृष्टिश्रुतौसृष्टिप्रत्यर्थी अन्यत्रश्रुतमपिभूतद्वयमाश्रित्यभूतपंचका
भिप्रायेणभूतत्रयसृष्टिप्रतिपादनादविरोधः आकाशादिपंचभूतेषुचतुर्धा
विभक्तानांमन्येषांपंचभूतानांप्रत्येकानुप्रवेशेनपंचीकृतानामाकाशादीनांपं

वे.टी. पंचात्मकत्वाद्विशेषादाकाशादिव्यपदेशो न भवति स्यादिति॰ आशंक्य परि
२६ हरति पंचानां पंचात्मकत्वसमानेपि तेषु वैशेष्यात्तु तद्वादस्तद्वाद इति न्यायेनाका
शादिव्यपदेशः संभवति॰ आकाशादीनां पंचानां पंचात्मकत्वे समानेपि तेषु पंचभू
तेषु तद्विशेषानुप्रवेशात्तन्नामभिर्व्यवहारः संभवतीत्यर्थः तदानीमाकाशेऽश
ब्दोऽभिव्यज्यते॰ यदा पंचीकृतान्याकाशादीनि तदानीं स्थूलत्वेन स्वस्वकार्योत्पा
दनासमर्थत्वादाकाशेऽव्यक्तरूपेण स्थितः शब्दोऽभिव्यज्यतेऽभिव्यक्तो भवतीत्य
र्थः वायौ शब्दस्पर्शौ अग्नौ शब्दस्पर्शरूपाणि अप्सु शब्दस्पर्शरूपरसाः
पृथिव्यां शब्दस्पर्शरूपरसगंधाश्च॰ उक्तेभ्यो भूतेभ्यश्चतुर्दशभुवनोत्पत्तिप्रकारं
दर्शयति एतेभ्यः पंचीकृतेभ्यो भूतेभ्यः भूर्भुवःस्वर्महर्जनस्तपःसत्यमित्येत २६
न्नामकादीनामुपर्युपरि विद्यमानानामतलपातालवितलसुतलरसातलत

लातलानामनेकानामधोधो विद्यमानानां लोकानां ब्रह्मांडस्य चतुर्विधस्थूलशरी
राणां तदुचितानामन्नपानादीनां चोत्पत्तिर्भवति एतेभ्यो भूतेभ्यः समुत्पन्नब्रह्मां
डस्य चतुर्विधशरीराणां च तद्योग्यान्नपानादीनां चोत्पत्तिर्भवतीत्यर्थः चतु
र्विधशरीराण्युद्दिशति चतुर्विधशरीराणि तु जरायुजांडजोद्भिज्जस्वेदजाख्या
नि तानि च यथोद्देशं विवृणोति जरायुभ्यो जातानि मनुष्यपश्वादीनि॰ अंडजान्यं
डजेभ्यो जातानि च पक्षिपन्नगादीनि उद्भिज्जानि भूमिमुद्भिद्य जातानि कक्ष
वृक्षादीनि स्वेदजानि स्वेदजेभ्यो जातानि यूकमशकादीनि पूर्ववदत्रापि सम
ष्टिव्यष्टिभेदं दर्शयति अत्रापि चतुर्विधसकलस्थूलशरीरमेकानेकबुद्धिवि
षयतयानेकबुद्धिविषयतया व्यष्टित्वं च भजत इत्यर्थः अधुना भूरादिभुवनचतु
र्दशांतर्गतचतुर्विधस्थूलशरीरसमष्ट्युपहितचैतन्यस्य वैश्वानरत्वापरपर्या

वे॰ टी॰ यं वैराजत्वं दर्शयति॰ यत्समष्ट्युपहितं चैतन्यं वैश्वानरो विराडित्युच्यते तत्र युक्ति
सर्वनराभिमानित्वाद्विविधराजमानत्वाच्च॰ सर्वप्राणिनिकायेष्वहमित्यभिमान
२८ त्वाद्वैश्वानरत्वं विविधं नानाप्रकारेण प्रकाशमानत्वाच्च वैराजत्वं लभत इत्यर्थः अ
स्यैषा समष्टिः स्थूलशरीरं अस्य विराट् चैतन्यस्यैषा पूर्वोक्ता या ब्रह्मांडांतर्गतच
तुर्गतस्थूलशरीरसमष्टिरेव स्थूलशरीरमित्यर्थः अन्नविकारत्वादन्नमयः को
शः स्थूलभोगायतनत्वाच्च॰ स्थूलशरीरं जाग्रच्चेति व्यपदिश्यते अन्नविका
रत्वात्कुल्यादन्नमयत्वं॰ आत्माच्छादकत्वात्कोशत्वं स्थूलशरीरादिविषयप्रयु
क्त सुखदुःखभोगायतनत्वाच्च स्थूलशरीरत्वं इंद्रियैरर्थोपलब्धेश्च जाग्रद २८
वस्थात्वं च घटत इत्यर्थः चतुर्विधस्थूलशरीरसमष्ट्युपहितचैतन्यमप्रपंच

मभिप्रायेदानीं तद्व्यष्ट्युपहितं चैतन्यं विश्व इत्युच्यते इतेषां चतुर्विधशरीराणां
या व्यष्टिस्तत्तच्छरीरव्यक्तिस्तदुपहितं चैतन्यं विश्व इति उच्यते इत्यर्थः अत्र हेतुमाह
सूक्ष्मशरीराभिमानं परित्यज्य स्थूलशरीरादि प्रविष्टत्वात् सूक्ष्मलिंगशरी
राभिमानं परित्यज्य स्थूलशरीरेषु प्रविश्य तत्तत्स्थूलशरीरेषु सर्वेष्वप्येकमहमहमि
त्यभिमानवत्वाद्विश्व इत्यर्थः अस्याप्येषा व्यष्टिः स्थूलशरीरं अस्य चैतन्यस्याप्ये
षा तत्तच्छरीरव्यक्तिविशेषप्रलक्षणा व्यष्टिः सैव स्थूलशरीरमित्यर्थः अत्राप्य
न्नविकारत्वात्कुल्यादन्नमयत्वं॰ चैतन्याच्छादकत्वात्कोशत्वमिंद्रियैरर्थोपलंभा
ज्जाग्रत्वं च क्रमेण दर्शयति॰ अन्नविकारत्वादेव हेतोरन्नमयः कोशः कोशः अथ
जाग्रदवस्थायां विश्ववैश्वानरयोस्तन्मद्देवताधिष्ठितश्रोत्रादिभिश्चतुर्दशभिः
करणैः शब्दादिविषयग्रहणप्रकारं दर्शयति॰ तदानीमेतौ विश्ववैश्वानरौ दिग्वाता

वे.टी. र्कवरुणाश्विभिः क्रमान्नियंत्रितेन श्रोत्रादींद्रियपंचकेन क्रमाच्छब्दस्पर्शरू
२८ परसगंधान् अग्नींद्रोपेंद्रयमप्रजापतिभिः क्रमान्नियंत्रितेन वागादींद्रि
यपंचकेन वागादींद्रियपंचकेन क्रमाद्वचनादानगमनविसर्गानंदादीन् चंद्रच
तुर्मुखशंकराच्युतैः क्रमान्नियंत्रितेन मनोबुद्ध्यहंकारचित्ताख्येनांतरिंद्रिय
चतुष्केण क्रमात्संकल्पविकल्पनिश्चयाहंकार्यचैत्यांश्च सर्वानेतान् स्थूलवि
षयाननुभवतः अस्मिन्नर्थे श्रुतिं संवादयति जागरितस्थानो बहिष्प्रज्ञ इत्या
दिश्रुतेः अनयोर्विश्ववैश्वानरयोर्वनवृक्षावच्छिन्नाकाशदृष्टांतेन जलाश
यजलगतप्रतिबिंबाकाशदृष्टांतेन पूर्ववदभेदं साधयति अत्राप्यनयोः स्थूल २८
व्यष्टिसमष्ट्योरुपहितविश्ववैश्वानरयोश्च वनवृक्षवदवच्छिन्नाकाशवज्जलाश

तदवच्छिन्नाकाशवज्जलाशयजलवत्तद्गतप्रतिबिंबाकाशवच्च पूर्ववदभेदः
स्थूलप्रपंचोत्पत्तिमुपसंहरति एवं पंचीकृतभूतेभ्यः स्थूलप्रपंचोत्पत्तिः स्थूलसू
क्ष्मकारणप्रपंचानां व्यष्टित्वेनोक्तानां प्रत्येकविवक्षयावांतरप्रलयं चलमभिधाये
दानींतेषां समष्टेरेव महाप्रपंचत्वं दर्शयति एतेषां स्थूलसूक्ष्मकारणप्रपंचानाम
पि रेको महान्प्रपंचो भवति तत्र दृष्टांतमाह यथावांतरवनानां समष्टिरेको
महद्वनं भवति यथावांतरजलाशयानां समष्टिरेको महाञ्जलाशयः यथाधवा
दिरपलाशाद्यवांतरवनानां समष्टिः समुदायविवक्षया एकं महद्वनं भवति यथावा
पीकूपतडागाद्यवांतरजलाशयानां समष्टिसमुदायविवक्षया एको महान् जला
शयो भवति तथा स्थूलसूक्ष्मकारणवांतरप्रपंचानां समुदाय एको महान्प्रपं

वे.टी. चोभवतीत्यर्थः एतदेवांतरमहाप्रपंचोपहितानां विश्वतैजसप्राज्ञानां वैश्वानरेणहिर
ण्यगर्भाव्याकृतानां चावांतरवनावच्छिन्नाकाशवदवांतरजलाशयगतप्रतिबिंबाका
२९ शवच्चाभेद इत्याह एतदुपहितं वैश्वानरादीश्वरपर्यंतं चैतन्यमप्यवांतरवनावच्छिन्नाका
शवदवांतरजलाशयगतप्रतिबिंबाकाशवच्चैकमेव चैतन्यप्रपंचयोर्भेदे सर्वं ख
ल्विदं ब्रह्मेति श्रुत्या विरोधमाशंक्य परिहरति आभ्यां महाप्रपंचतदुपहितचैतन्या
भ्यां तप्तायःपिंडवदविविक्तं सदनुपहितं चैतन्यं सर्वं खल्विदं ब्रह्मेति वाक्यस्य वाच्यं भ
वति अन्योन्यतादात्म्याध्यासेनापि स लक्ष्यं भवतीत्यर्थः अध्यारोपप्रकरणमुप
संहरति अध्यारोपप्रकरणमुपसंहरति एवं वस्तुन्यवस्त्वारोपः सामान्येन दर्शि
तः ईश्वरचैतन्ये सामान्यतो महाप्रपंचाध्यारोपप्रकारं सप्रपंचमभिधायेदानीं प्र २९
त्यगात्मनि विशेषाध्यारोपप्रकारं दर्शयितुमुपक्रमते इदानीमित्यादिना इद

मितीदानीं प्रत्यगात्मनि इदमिदमारोपयतीति विशेष उच्यते अतिप्राकृतस्य प्रत्यक्षा
दिसंनिहितस्यापत्यादिधर्मिण इदमिदमिति निर्देशः क्रियते इदमिदमित्यादिरेषा वी
प्सा तथा चातिस्थूलबुद्धिस्तु इदं अपत्यादिकमेवाहं अयं पुत्र एवाहमित्यतं बाह्यध
र्मविशेषेणात्मन्यध्यारोपयतीत्यर्थः अत्र श्रुतिमाह आत्मा वै जायते पुत्र इति श्रु
तेः तत्र युक्तिमाह स्वस्मिन्निव पुत्रे प्रेमदर्शनात् पुत्रे पुष्टे नष्टे चाहमेव पुष्टो नष्टश्चेत्या
द्यनुभवाच्च पुत्र आत्मेति वदति यथा स्वशरीरे प्रेमदर्शनादात्मत्वभ्रमः स्वपु
त्रादिशरीरे पि प्रेमदर्शनादात्मत्वभ्रमः अत्रानुरूपमनुभवमाचष्टे पुत्र इति
विशिष्टबुद्धिरन्यः कश्चिदधिकारी स्वदेहमेव आत्मानं मन्यत इत्याह चार्वाकस्तु
अत्रापि श्रुतिमाह स वा एष पुरुषोन्नरसमय इत्यादिश्रुतेः पुत्रादिशरीरस्या

वे॰ टि॰ त्मत्वाभावेयुक्तिं दर्शयन्पूर्वोक्ताधिकारिणः सकाशात्स्वस्य वैलक्षण्यं दर्शयति॰
३० प्रदीप्तगृहात्स्वपुत्रं परित्यज्यापि स्वस्य निर्गमदर्शनात् देहस्यात्मत्वे अनुभवं च प्र
माणयति॰ स्थूलोहमित्याद्यनुभवाच्च स्थूलशरीरमात्मेति वदतीति ततोप्युक्तः॰
कोपि अधिकारी श्रुतियुक्त्यनुभवेभ्य इंद्रियाण्यात्मेति वदतीत्याह॰ अपरश्चार्वाकस्ते
ह प्राणाः प्रजापतिमेत्य ब्रूयुरित्यादिश्रुतेः इंद्रियाणामभावे शरीरचलनाभावात्का
णोहं बधिरोहमित्याद्यनुभवाच्चेंद्रियाण्यात्मा॰ अपरश्चार्वाकोन्यः अंतर आत्मा प्राण
मय इत्यादिश्रुतेः प्राणाभावे इंद्रियादिचलनायोगात् ×तिवदति॰ ततोप्युत्तमाधि
कारी कश्चिच्छ्रुतिप्रमाणानुभवबलात्प्राण एवात्मेत्याह॰ × हमशनायावानहं पि
पासावानित्याद्यनुभवाच्च प्राण आत्मेति वदति ततो विशिष्टोधिकारी कश्चि ३०

त्स्वमतानुकूलश्रुत्यादिबलान्मन एवात्मेत्याह॰ अन्यस्तु चार्वाकोन्योंतर आत्मा मनो
मनोमय इत्यादिश्रुतेः मनसि सुप्ते प्राणादेरभावात् अहं संकल्पवानहं विकल्पवानित्या
द्यनुभवाच्च मन आत्मेति वदति उक्तेभ्यः पंचभ्यो विलक्षणः कश्चिद्विज्ञानवादी श्रुत्या
दिभिर्विज्ञानमात्मेत्याह॰ बौधस्त्वन्योंतर आत्मा विज्ञानमय इत्यादिश्रुतेः कर्तुरभावे
करणस्य शक्त्यभावात् अहं कर्ताहं भोक्तेत्याद्यनुभवाच्च बुद्धिरात्मेति वदति॰ उक्ते
भ्योतिरिक्तः प्रभाकरतार्किकौ स्वमतोपयोगि श्रुत्यादिबलाभासादज्ञानमात्मेति वद
त इत्याह॰ प्रभाकरतार्किकौ॰ अन्योंतर आत्मा आनंदमय इत्यादिश्रुतेः बुद्ध्यादी
नामज्ञाने लयदर्शनात् अहमज्ञोहमज्ञानीत्याद्यनुभवाच्च आनंदमात्मेति वदतः
भाट्टास्तु अज्ञानावच्छिन्नचैतन्यमात्मेत्याह॰ प्रज्ञानघन एवानंदमय इत्यादि

वे. टी. श्रुतेः सुषुप्तौ प्रकाशाप्रकाशसद्भावान्मामहं न जानामि इत्याद्यनुभवाच्च अज्ञा
नोपहितं चैतन्यमात्मेति वदति बौद्धैकदेशः कश्चित् श्रुत्यादिभिः शून्यमात्मेति वदति
३२ असदेवेदमग्र आसीत् इत्यादिश्रुतेः सुषुप्तौ सर्वाभावादहं सुषुप्तौ नासमित्युत्थितस्य
स्वाभावपरामर्शविषयानुभवाच्च शून्यमात्मेति वदति अथ पुत्रादिशून्यपर्यं
तामात्मत्वप्रतिपादकश्रुत्यादेराभासत्वात् पूर्वपूर्वमतस्योत्तरोत्तरमतबाध्यमा
त्वाच्च जडादिहेतुकदर्बकैश्चानात्मत्वं प्रसिद्धमेवेति प्रतिपादयितुं प्रतिजानीते एते
षां पुत्रादीनामनात्मत्वमुच्यते पुत्राद्यात्मत्ववादिनामतिमंदाधिकारित्वात्त
त्प्रतिपादितश्रुत्यादेरपि पूर्वपूर्वस्योत्तरोत्तरबाध्यत्वात्पुत्रादिशून्यांतानामनात्म ३२
त्वं प्रसिद्धमेवेति प्रतिज्ञातमेवार्थं प्रकटयति एतैरति प्राकृतादिवादिभिरुक्तेषु

श्रुतियुक्त्यनुभवाभासेषु पूर्वपूर्वोक्तश्रुतियुक्त्यनुभवाभासानामुत्तरोत्तरश्रुति
युक्त्यनुभवाभासैरात्मत्वबाधदर्शनात् पुत्रादीनामनात्मत्वं स्पष्टमेव ननु पुत्रादिशू ३३
न्यपर्यंतानामनात्मत्वे सिद्धे कस्तर्ह्यहंप्रत्ययविषय आत्मेति आशंक्याह श्रुत्यादिनिषे
धवाक्यजातबोधितं सत्यं ज्ञानमनंतं ब्रह्मेत्यादिविधिवाक्यकोटिबोधितं यत्सत्यज्ञा
नानंताद्वयं ब्रह्म तदेवाहमालंबनमिति प्रबलश्रुतियुक्त्यनुभवैः प्रतिपादयितुमाह
किंच प्रत्यगस्थूलोचक्षुरप्राणोमना अकर्ता चैतन्यं चिन्मात्रं सदित्यादिप्रबलश्रु
तिविरोधादस्य पुत्रादिशून्यपर्यंतस्य जडस्य चैतन्यभासत्वेन घटादिवदनित्यत्वा
३३ दस्यत्वादिप्रबलश्रुतिवाक्यैः पुत्रादिशून्यपर्यंतात्मातिरिक्तस्वरूपप्रतिपादनात्
पुत्रादीनां जडत्वादिहेतुभिरनात्मत्वमित्यर्थः अस्मिन्नर्थे प्रबलविद्वदनुभवं प्रमा
वे. टी. णयति अहं ब्रह्मेति विद्वदनुभवप्राबल्या[illegible]च्च पुत्रादिश्रुत्यादीनां दौर्बल्यं दर्शय

वे॰ टी॰ तत्र श्रुतियुक्त्यनुभवाभासानां बाधितत्वादपि पुत्रादिशून्यपर्यंतमखिलमनात्मैव
तत्प्रकाशकं नित्यशुद्धबुद्धमुक्तसत्यस्वभावं प्रत्यक्चैतन्यमेवात्मवस्तु इति वे
३२ दांतविद्वदनुभवः यतः पुत्रादीनां जडत्वादिहेतुभिरनात्मत्वं अतः पुत्रादिभासकं
नित्यशुद्धबुद्धत्वादिस्वरूपमेवात्मवस्त्वित्यर्थः ननु इदं विरुद्धं यत्पुत्रादीनामात्मप्रति
पादकश्रुतीनामप्रामाण्यं अस्थूलादिश्रुतीनां प्रामाण्यमिति न हि वेदवाक्येषु केषांचि
दप्रामाण्यमिति वाक्यं प्रतिपादयितुं एवं चेत् पुत्रादिश्रुतीनां प्रामाण्यमस्थूलादि
वाक्यानामप्रामाण्यमिति वैपरीत्यं किं न स्यात् वेदवाक्यत्वाविशेषात् किं केषांचि
द्वेदांतवाक्यानामप्रामाण्यप्रतिपादनार्थमिदं प्रकरणमारब्धं अतः निर्णय इति चेत् ३२
अत्रोच्यते पुत्रादिश्रुतीनां सर्वथैवाप्रामाण्यं नास्तीति न निषिध्यते किंत्वस्थूला

दिप्रबलश्रुतिस्मृतिन्यायाविरोधात्स्वार्थे तात्पर्याभावात्तेषां श्रुतीनामरुंधतीन्या
येन पूर्वपूर्वनिराकरणद्वारा सूक्ष्मसूक्ष्मवस्तूपदेशे तात्पर्यमित्येतावदेव प्रतिपाद्य
ते तथा हि ध्रुवमरुंधतीं च दर्शयतीति विधिबलाद्वरवध्वोररुंधतीदर्शने प्राप्ते परम
सूक्ष्मरूपाया अरुंधत्याः प्रथमकक्षायामेव प्रतिपत्तुमशक्यत्वात् प्रथमं चंद्रज्योति
रूपारुंधतीत्युच्यते चंद्रमित्रा तारकारुंधतीत्युच्यते ततश्चेतरतारकाभिन्ना
सप्ततारकात्मकारुंधतीत्युच्यते तदनंतरं इतरतारकाचतुष्टयभिन्ना तारका
त्रितयात्मिकेत्युच्यते ततस्तन्मध्यतारकेत्युच्यते ततस्तत्समीपवर्तिनी परमसू
क्ष्मारुंधतीत्युच्यते न चैतावता एतेषां पंचानां वाक्यानां परस्परविरुद्धार्थप्रतिपा
दकेनाप्रामाण्यं वाक्यं प्रतिपादयितुं किं तु प्रतिपत्तृबुध्यनुसारेण सोपानक्रमव
त्पूर्वपूर्वनिराकरणद्वारा सूक्ष्मारुंधतीप्रतिपादने तात्पर्यात् तद्वदत्रापि अस्थू

वे. टी. मयः प्राणमयो मनोमयो विज्ञान आनंदमय आत्मा ब्रह्मा ब्रह्मपुच्छं प्रतिष्ठेति
पुच्छब्रह्मपर्यवसितानां पंचकोशवाक्यानामपि परस्परविरुद्धार्थप्रतिपाद
३२ कत्वेपि प्रतिपत्त्यनुसारेण सोपानक्रमवत् पूर्वपूर्वनिराकरणद्वारा परमस्त
पुच्छब्रह्मप्रतिपादने तात्पर्यात् तस्मात्सर्वेषां वेदवाक्यानां साक्षात्परंपरया वा
अद्वितीयवस्तुप्रतिपादने तात्पर्यान्न प्रामाण्यविरोध इति संक्षेपः विशेषाध्यारोप
प्रकरणमुपसंहरति एवं अध्यारोपः अवस्तुनि मिथ्याप्रपंचस्य सामान्यतो वि
शेषतश्चेति अध्यारोपप्रकारं सप्रपंचमभिधायेदानीं तदपवादप्रकारं वक्तु
मारभते अपवादो नामेति असंहतोदासीने परमात्मवस्तुनि तद्विवर्तवस्तुभ्र
मादज्ञानादिमिथ्याप्रपंचस्य चिद्वस्तुमात्रावशेषतया अवस्थानमेवापवाद इ ३२
ति वक्तुं प्रथमं लौकिकं दृष्टांतमाह रज्जुविवर्तस्य सर्पस्य रज्जुमात्रत्ववद्

स्तुविवर्तस्याज्ञानादेः प्रपंचस्य वस्तुमात्रत्वं रज्जुस्वरूपापरिसर्पाकारेण
भासमानस्य रज्जोः रज्जुस्वरूपापरित्यागेन सर्पाकारेण मिथ्याप्र
तिभासते अत्र वेदांते ब्रह्मणि प्रपंचस्य भानस्य परिणामभावो नांगी
क्रियते दुग्धादिवद् ब्रह्मणो विकारित्वप्रसंगादनित्यत्वादिदोषापत्तेः
विवर्तभावांगीकारे तु नायं दोषः ब्रह्मणि प्रपंचभानस्य मिथ्यात्वेन विका
रित्वाभावात् तदुक्तं अधिष्ठानावशेषो हि नाशः कल्पितवस्तुन इति तस्मा
द्विवर्तस्य प्रपंचस्य चिन्मात्रावस्थानमेवापवादः अस्मिन्नर्थे ग्रंथांतरसंवाद
यति तदुक्तं सतत्त्वतोन्यथाप्रथा विकार रज्जुविवर्तस्यापवादो नाशो नामा
धिष्ठानरज्जुमात्रतया अवस्थानं [illegible] विवर्तस्याज्ञानादिप्रपंचस्य नाशो

वे॰ टी॰ नामचिन्मात्रत्वेनावस्थानमित्यर्थः अत्र यथास्वरूपेणावस्थितस्य वस्तुनोन्यथा
३४ भावो द्विधा भवति परिणामभावो विवर्तभावश्चेति तत्र परिणामभावो नाम वस्तु
नः यथार्थतः स्वस्वरूपं परित्यज्य स्वरूपांतरापत्तिः यथा दुग्धमेव स्वस्वरूपं प
रित्यज्य दध्याकारेण परिणमते विवर्तभावस्तु वस्तुनः स्वस्वरूपापरित्या
गेन स्वरूपांतरेण मिथ्याप्रतीतिः यथा इत्युदीरितः अतत्त्वतोन्यथाप्रथा
विवर्त इत्युदीरितः सामान्यतो दर्शितामपवादप्रक्रियां विस्तरेण प्रतिपा
दितुं प्रतिजानीते तथाहि स्थूलसूक्ष्मकारणप्रपंचानामुत्पत्तिवैपरीत्ये
न तत्तत्कारणरूपेणावस्थानमेवापवाद इत्याह एतद्भोगायतनं चतुर्विध ३४
स्थूलसूक्ष्मशरीरजातं भोग्यरूपान्नपानादिकं एतदायतनभूतभूरादि

चतुर्दश भुवनानि एतदायतनभूतब्रह्मांडं च एतत्सर्वमेतेषां कारणरूपं पंची
कृतभूतमात्रं भवति एतानि शब्दादिविषयसहितानि पंचीकृतानि भूतानि ३५
सूक्ष्मशरीरजातं चैतत्सर्वमेतेषां कारणरूपापंचीकृतभूतमात्रं भवति एता
नि सत्त्वादिगुणसहितानि अपंचीकृतान्युत्पत्तिव्युत्क्रमेणैतत्कारणभूताज्ञा
नोपहितचैतन्यमात्रं भवति एतदज्ञानमज्ञानोपहितचैतन्यं चेश्वरादिकं एत
दाधारभूतानुपहितचैतन्यरूपं तुरीयमात्रं ब्रह्म भवति एतत्स्थूलशरीरं ब्रह्मा
ण्डसहितं स्वकारणभूतपंचीकृतेषु पंचमहाभूतेषु लीनं सत्तन्मा
त्रतया वर्तिष्यते तानि च पंचीकृतानि भूतानि शब्दादिसहकृतानि सप्तदशा
वयवानि सूक्ष्मशरीराणि स्वकारणापंचीकृतभूतेषु लीनानि भवंति तान्यं

वे॰ टी॰ वीकृतानिसत्त्वादिगुणसहितानिस्वकारणाज्ञानोपहितचैतन्येलीनानिभवं
ति॰ तथाज्ञानोपहितचैतन्यंसर्वज्ञत्वादिविशिष्टंचस्वाधारभूतानुपहितचैत
३५ न्येलीनंभवतिचैतन्यमेवावशिष्यतइत्यर्थः फलितमाह॰ आभ्यामध्यारो
पापवादाभ्यांतत्त्वंपदार्थशोधनमपिसिद्धंभवति॰ तत्त्वंपदार्थशोधनप्रका
रंप्रतिजानीते॰ तथाहि॰ अज्ञानादिसमष्टिरेतदुपहितंसर्वज्ञत्वादिविशि
ष्टंचैतन्यं एतदनुपहितंचैतत्त्रयंतप्तायःपिंडवदेकत्वेनावभासमानंतत्प
दवाच्यार्थोभवति अज्ञानंतदवच्छिन्नेश्वरंनैकत्वेनप्रतीयमानंसत्तत्पदवा
च्यार्थोभवतीत्यर्थः तत्पदलक्ष्यार्थमाह॰ तदुपाध्युपहिताधारमनुपहितंचैत
न्यंतत्पदलक्ष्यार्थोभवति॰ अज्ञानावच्छिन्नेश्वरचैतन्यस्याधारभूतंयद ३३
नुपहितचैतन्यंतत्ताभ्यांविविक्तंसद्भेदविवक्षयातत्पदलक्ष्यार्थोभवती

त्यर्थः त्वंपदवाच्यार्थमाह॰ अज्ञानादिव्यष्टिरेतदुपहितज्ञत्वादिविशिष्टंचैतन्यंएतदनुपहि
तंचैतत्त्रयंतप्तायःपिंडवदेकत्वेनावभासमानंत्वंपदवाच्यार्थोभवति॰ व्यष्टिभूतमज्ञानंयदं
तःकरणंतदवच्छिन्नंजीवचैतन्यंतदनुपहितचैतन्यंचेत्येतत्त्रयंतप्तायःपिंडवत्परस्परतादा
त्म्याध्यासेनाभेदावलक्षयात्वंपदवाच्यार्थोभवतीत्यर्थः। त्वंपदलक्ष्यार्थमाह॰ एतदुपाध्युप
हिताधारमनुपहितंप्रत्यगानंदंतुरीयंचैतन्यंत्वंपदलक्ष्यार्थोभवति अंतःकरणोप
हितचैतन्यत्रयस्यआधारभूतंयदनुपहितंप्रत्यगानंदंतुरीयंचैतन्यंत्वंपदलक्ष्यार्थो
भवतीत्यर्थः पदार्थमभिधायवाक्यार्थमाह॰ अथमहावाक्यार्थोवर्ण्यते ननु
जीवेश्वरयोःकिंचिज्ज्ञत्वसर्वज्ञत्वादिविशिष्टयोरत्यंतंविलक्षणयोस्तत्त्वम
स्यादि~~वाक्यानि~~ महावाक्यानिपरस्परविरुद्धार्थप्रतिपादकानिकथमखं
डैकरसंप्रतिपादयंतीत्याशंक्यसाक्षादैक्यप्रतिपादकाभावेपिलक्षण

वे॰ टी॰ यासंबंधत्रयेणाखंडैकार्थंप्रतिपादयंतीत्याह॰ इदंतत्त्वमसिवाक्यसंबंधत्र
येणाखंडार्थबोधकंभवति॰ संबंधत्रयस्वरूपमाह॰ संबंधत्रयंनामपदयोः
३६ सामानाधिकरण्यंपदार्थयोर्विशेषणविशेष्यभावः प्रत्यगात्मलक्षणयोः
लक्ष्यलक्षणयोः लक्ष्यलक्षणभावश्चेतिपदार्थप्रत्यगात्मनांसंबंधत्रयस
द्भावे वृद्धसंमतिमाह॰ तदुक्तंसामानाधिकरण्यंचविशेषणविशेष्यता॰
लक्ष्यलक्षणसंबंधः पदार्थप्रत्यगात्मनामितिपदयोः सामानाधिकरण्यमु
दाहरणनिष्ठंकृत्वाप्रदर्शयति समानाधिकरण्यसंबंधस्तावत् यथासो
यंदेवदत्तइति अस्मिन्वाक्येतत्कालविशिष्टदेवदत्तवाचकसशब्दस्य
तत्कालविशिष्टदेवदत्तवाचकोयंशब्दस्यचैकस्मिन्पिंडेतात्पर्यसंबंधः ३५
भिन्नप्रवृत्तिनिमित्तयोः शब्दयोरेकस्मिन्नर्थेवृत्तिः सामानाधिकरण्यंत

तच्चसोयंदेवदत्त इतिवाक्येसइतितत्पदस्यतत्पदस्य तत्कालतद्देशवैशिष्ट्यप्रवृ
त्तिनिमित्तमेतत्कालैतद्देशवैशिष्ट्यमयंशब्दस्यप्रवृत्तिनिमित्तंतथाचभिन्नप्रवृत्तिनि
मित्तयोः सोयंशब्दयोरेकस्मिन्देवदत्तपिंडेतात्पर्यसंबंधः सामानाधिकरण्यमि
त्यर्थः उक्तमर्थंदार्ष्टांतिकेयोजयति॰ तथाचतत्त्वमसीतिवाक्येपिपरोक्षत्वादिविशि
ष्टचैतन्यवाचकतत्पदस्यापरोक्षत्वादिविशिष्टचैतन्यवाचकत्वंपदस्यचैकस्मि
न्चैतन्येतात्पर्यसंबंधः तथातत्त्वमसीतिवाक्येपिपरोक्षत्वसर्वज्ञत्वादिवैशि
ष्ट्यंतत्पदप्रवृत्तिनिमित्तमपरोक्षत्वकिंचिज्ज्ञत्वादिवैशिष्ट्यंत्वंपदप्रवृत्तिनिमित्तं
तथाचभिन्नप्रवृत्तिनिमित्तयोः तत्त्वंपदयोरेकस्मिन्चैतन्येतात्पर्यसंबंधः सा
मानाकरण्यमित्यर्थः ।२। विशेषणविशेष्यभावसंबंधस्वरूपमाह॰ विशेषण
विशेष्यभावसंबंधस्तुयथातत्रैववाक्येसशब्दार्थतत्कालविशिष्टदेवदत्तस्यायं

वे. टी. शब्दार्थस्य तत्कालविशिष्टदेवदत्तस्य च अन्योन्यभेदव्यावर्त्तकतया विशेषणविशेष्य
भावः व्यावर्त्तकं विशेषणं व्यावर्त्यं विशेष्यं तथा च सोयं देवदत्त इति वाक्ये सोयंशब्द
२८ वाच्यो योसावेतत्कालैतद्देशसंबंधविशिष्टो देवदत्तपिंडः अयं स इति तच्छब्दवाच्या
त्तत्कालतद्देशविशिष्टदेवदत्तपिंडाद्भिन्नो नेति यदा प्रतीयते तदा तच्छब्दार्थस्या
यंशब्दवाच्यार्थनिष्ठभेदव्यावर्त्तकतया विशेषणत्वं अयंशब्दस्य व्यावर्त्यत्वाद्विशेष्य
त्वं यदा च स इति तच्छब्दवाच्यार्थतत्कालतद्देशविशिष्टो देवदत्तपिंडः स अयमिती
दंशब्दवाच्यादेतत्कालैतद्देशसंबंधविशिष्टाद्देवदत्तपिंडान्नभिद्यते इति यदा
प्रतीयते तदा अयंशब्दवाच्यस्य तच्छब्दार्थनिष्ठभेदव्यावर्त्तकतया विशेषणत्वं तच्छ
ब्दार्थस्य व्यावर्त्यतया विशेष्यत्वं तथा चायमेवं सः स एवायमित्यन्योन्यभेदव्यावर्त्त २८
कतया सोयंशब्दार्थयोः परस्परं विशेषणविशेष्यभावः उक्तं विशेषणविशेष्य

भावता॥ इति के योजयन्ति तथा चापि वाक्ये तत्पदार्थपरोक्षत्वादिविशिष्टचै
तन्यस्य त्वंपदार्थपरोक्षत्वादिचैतन्यस्य चान्योन्यभेदव्यावर्त्तकतया विशेषण
विशेष्यभावः इहापि तत्त्वमसि वाक्येपि त्वंपदवाच्यं यदपरोक्षत्वकिंचिज्ज्ञत्वा
दिविशिष्टं चैतन्यं तत्पदवाच्यात् सर्वज्ञत्वादिविशिष्टचैतन्यान्नभिद्यते